मौर्व्या मेखलया नियन्त्रितमधोवासश्च माञ्जिष्ठिकं
पाणौ कार्म्मुकमक्षसूत्रवलयं दण्डं तथा (१) पैप्पलम् ॥२०॥

चूडेति । अयं बालकः, पृष्ठतः अभितः पृष्ठस्य उभयोः पार्श्वयोः चूडाभिः शिखाभिः केशाग्रैरित्यर्थः चुम्बितानि स्पृष्टानि कङ्कपत्राणि कङ्कनामकपक्षिपक्षाः सरलशीघ्रगमनार्थं बाणमूलभागे दत्ता यस्य तत्तथोक्तं तूणीद्वयं तूणीरयुगलं, लम्बितकेशाग्रसंस्पृष्टबाणान्विततूणीरद्वयमित्यर्थः । तथा भस्मनां स्तोमेन पुञ्जेन पवित्रं लाञ्छनं चिह्नं यत्र तादृशं, पवित्रस्तोमवद्भिभस्मना चिह्नितमित्यर्थः उरो वक्षःस्थलं । तथा रुरोर्मृगविशेषस्येयम् इति रौरवी तां त्वचं चर्म्म, मृगचर्म्मरूपमुत्तरीयमित्यर्थः । मूर्वायाः तृणविशेषस्येयमिति मौर्वी तया, मूर्वासूत्रनिर्म्मितयेत्यर्थः मेखलया काञ्च्या कटिसूत्रेणेति यावत् नियन्त्रितं नियद्धं मञ्जिष्ठया संसृष्टमिति माञ्जिष्ठिकं मञ्जिष्ठानामलतारञ्जितमित्यर्थः अधोवासः परिधेयवसनञ्च । तथा पाणौ करे कार्म्मुकं धनुः तथा अक्षसूत्रवलयं वलयीकृतां सूत्रग्रथितजपमालामित्यर्थः, तथा पिप्पलस्य अश्वत्थस्य अश्वत्थशाखाया इत्यर्थः अयमिति पैप्पलः तं दण्डञ्च धत्ते बिभर्त्ति । वामपाणौ धनुः, दक्षिणमणिबन्धे जपमालां दक्षिणपाणौ च दण्डं धत्ते इत्यर्थः । एभिश्चिह्नैः क्षत्रियब्रह्मचारी अयमिति निर्णीयत इति भावः ।

अत्र धत्ते इत्येकया क्रियया तूणीद्वयादीनां कर्म्मतयाऽभिसम्बन्धात् तुल्ययोगिताऽलङ्कारः ।

क्षत्रियब्रह्मचारिणो रौरवीत्तरीयादिधारणमाह मनुः—

“ कार्ष्णरौरवबास्तानि चर्म्माणि ब्रह्मचारिणः ।
वसीरन्नानुपूर्व्वेण शाणक्षौमाविकानि च ॥
मौञ्जी त्रिवृत् समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ।
क्षत्रियस्य तु मौर्व्वीज्या वैश्यस्य शणतान्तवी ॥ ”

गौतमः । “ वैल्वपालाशौ ब्राह्मणस्य दण्डौ, अश्वत्थपैलवौ शेषे । ”

“ समीपोभयतः शीघ्रसाकल्याभिमुखेऽभितः । ” बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः । अश्वत्थे ” इति चामरः ।

(१) दण्डोऽपर इति पाठान्तराणि ।

भगवत्यरुन्धति ! किमुत्प्रेक्षसे कुतस्त्योयमिति । (व)

अरु । अद्यैव वयमप्यागताः । (१) (श)

जन । आर्य्यगृष्टे ! अतीव मे कौतुकं वर्त्तते, तद्भगवन्तं वाल्मीकिमेव गत्वा पृच्छ, इमञ्च बालकं ब्रूहि, केऽप्येते प्रवयसस्त्वां दिदृक्षव इति । (ष)

कञ्चु । यदाज्ञापयसि । (स) इति निष्क्रान्तः ।

"अक्षसूत्रं । जपमाला" इति शब्दकल्पद्रुमः ।

अभित इति "पर्य्यभिभ्यां सर्वोभयाभ्या" मिति तसिः । पृष्ठत इति—"तसीभयाभिपरिसर्वं" रित्युत्पन्नाया द्वितीयायाः "सर्वविभक्तिभ्यस्तस्" इति तस् । शार्दूलविक्रीडितं वृत्तम् ॥ २० ॥

(व) भगीति । अयं बालकः कुत आगत इति कुतस्त्यः इति अस्मिन् विषये किमुत्प्रेक्षसे बुध्यसे किमनुमिनोषीत्यर्थः तद् ब्रूहीति भावः ।

कुतस्त्य इति "अव्ययात्त्यप्" इति त्यप्प्रत्ययः ।

(श) अरु इति । न केवलं भवन्तः, अपितु वयमप्यद्यैवागता इत्यर्थः । सुतरां भवत्समाना वयं पूर्वमदर्शनात नैनं परिचिनुम इति भावः ।

वयमिति "वास्मदर्थे" ति बहुवचनम् । अहमिति तदर्थः । नैनं परिचिनुम इत्युक्तौ मिथ्योक्तिः स्यादित्यतः अद्येत्याद्युक्तं छलेन वृत्तान्तगोपनं कृतमिति बोध्यम् ।

(ष) जनेति । केऽपि त्वया अपरिचिता इत्यर्थः, एते दृश्यमानाः, प्रकृष्टं प्रचुरं वयो येषां ते प्रवयसः स्थविराः । दिदृक्षवः । द्रष्टुमिच्छवः । इति ब्रूहीत्यर्थः ।

(स) कञ्चु इति । यदाज्ञापयसि तदेवानुतिष्ठामीत्यर्थः ।

---

(१) अद्यैव वयमागता इति विभिन्नः पाठः ।

कौश । किं भणध, एव्वं भणिदो आगमिस्सदित्ति । (छ)

मरु । भिद्येत किं सदृत्तकीदृशस्य निर्म्माणस्य ? । (च) (१)

कौश । निरूप्य । कहं सविणअं णिसामिदगिह्विअणो विसज्जिदइसिदारओ इदो अहिमुहं पसरिदो ज्जेव सो वच्छो । (क)

जन । चिरं निर्वर्ण्य । भोः ! किमप्येतत् । (ख)

महिम्नामेतस्मिन् विनय-शिशुता-मौग्ध्यमसृणो-
विदग्धैर्निर्ग्राह्यो (२) न पुनरविदग्धैरतिशयः ।

(छ) किं भणत, एवं भणित आगमिष्यतीति ।

(क) कथं सविनयं निशामितगृह्यवचनः विसर्जितऋषिदारक इतः अभिमुखं प्रसृत एव स वत्सः ।

(छ) कौशेति । एवं भणितः कञ्चुकिना जनकोद्दिष्टप्रकारेणोक्तः आगमिष्यति किमित्यर्थः, इति विषये यूयं किं भणथ इत्यर्थः ।

(च) मरु इति । ईदृशस्य अङ्गसौन्दर्य्यशालिनः निर्म्माणस्य सृष्टेः ।

"क्वचिद्दृतोभावी द्रव्यवत् प्रकाशते" इति न्यायात् विधात्रा परमसुन्दरीकृत्य निर्म्मित-स्येत्यर्थः, सदृत्तं सच्चरितं किं भिद्येत वियुज्येत, अपितु कथमपि नेत्यर्थः । "यत्रा-कृतिस्तत्र गुणा वसन्ती" ति न्यायात् सुन्दराकृतिमान् विनयान्न प्रच्यवेत इति भावः ।

(क) कौशेति । निरूप्य विशेषेणावलोक्य । निशामितं श्रुतं गृष्टं सदाख्यस्य कञ्चुकिनः वचनं येन सः । विसर्जिताः त्यक्ताः ऋषीणां मुनीनां दारकाः बालका येन सः, मुनिबालकच्छन्दान्निःसृत्य इत्यर्थः, इतोऽभिमुखं अस्मान् प्रतीत्यर्थः प्रसृतः प्रस्थितः ।

विसर्जितऋषिदारक इति "ऋत्यनित्यसमासेऽनुपसर्गसमानस्य ह्रस्वश्चे" ति सन्धि-प्रकृतिः ।

(ख) जनेति । भोः इति कौशल्यादीनां सम्बोधने । एतत् बालकरूपं हन्त किमपि अनिर्वचनीयमाश्चर्य्यमित्यर्थः ।

---

(१) भिद्येत वा इति पाठान्तरम् । (२) निग्राह्य इति पाठान्तरम् ।

मनो मे सम्मोदः (१) स्थिरमपि हरत्येव बलवान्
अयोधातुं यद्वत् परिलघुरयस्कान्तशकलः ॥ २१ ॥

प्रविश्य लवः । स्वगतम् । अज्ञातनामक्रमाभिजनान् पूज्यानपि नः स्वतः कथमभिवादयिष्ये । विचिन्त्य । अयं पुनरविरुद्धः

तदाश्चर्यं समर्थयति महिम्नामिति । एतस्मिन् शिशौ विदग्धैः निपुणैः लोकनिर्वाचनदक्षैरिति यावत् निर्वाच्यः निर्णेयः वोढुं शक्य इति यावत्, पुनः किन्तु अविदग्धैरनिपुणैर्जनैः न निर्वाच्य इत्यर्थः, तथा विनयो नम्रभावः शिशुता बालकत्वं ताभ्यां यत् मौग्ध्यं सरलता तेन मसृणः कोमलः स्नेहोत्पादक इत्यर्थः महिम्नां माहात्म्यानां दयादाक्षिण्यशौर्यवीर्यादिव्यञ्जकमहापुरुषभावानामित्यर्थः अतिशय आधिक्यं वर्तत इति शेषः । अतएव परिलघुर्नितान्तक्षुद्रोऽपि अयस्कान्तस्य लौहाकर्षकपदार्थविशेषस्य (चुम्बुक लोहा इति ख्यातस्य) शकलः खण्डः यद्वत् यथा अयोधातुं लौहं हरति आकृष्य नयति, तद्वत् बलवान् विशालः सम्मोदः एतद्बालकदर्शनजनितानन्दः मे मम स्थिरमपि योगाभ्यासेन निश्चलमपि मनः हरत्येव आकर्षत्येव । मादृशयोगिनोऽपि मनोहरणादनिर्वचनीय आश्चर्य एवायं बालक इति भावः ।

अत्र प्रथमपादे विनयशिशुतामौग्ध्यरूपाणां गुणानां यौगपद्यात् समुच्चयः, द्वितीयपादे शाब्दी परिसंख्या, द्वितीयार्द्धे च श्रौती उपमा, एतेषां परस्परनिरपेक्षस्थितेः संसृष्टिरलङ्कारः । तथा मौग्ध्यं त्यत्र दुःश्रवत्वदोषः, स च 'विनयशिशुभावार्जवमृदु' रिति पाठेन समाधेयः ।

"मसृणः ।···अकर्कशः ।" "विदग्धः ।···निपुण" इति च शब्दकल्पद्रुमः ।

"भित्तं शकलखण्डे वा" इत्यमरः ।

शङ्खः पाण्डर एवेत्यादिवत् हरत्येवेति एवशब्दस्य अयोगव्यवस्थापनार्थाभावात् अनियमे नियमाख्यदोषः ।

शिखरिणी वृत्तम् ॥ २१ ॥

(ग) प्रविश्येति । नोऽस्माकं पूज्यानपि ब्रह्मत्वदर्शनात् पूजनीयतया अभिवादन-

---

(१) सम्मोह इति विभिन्नः पाठः ।

प्रकार इति वृद्धेभ्यः श्रूयते । सविनयमुपसृत्य । एष वो लवस्य शिरसा प्रणामपर्य्यायः । (ग)

अरुन्धतीजनकौ । कल्याणिन् ! आयुष्मान् भूयाः । (घ)

कौश । जाद ! चिरं जीव । (ङ) (१)

अरु । एहि वत्स ! इति लवमुत्सङ्गे कृत्वा स्वगतम् । (२) दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथो मे सम्पूर्णः । (च)

(ङ) जात ! चिरं जीव ।

योग्यानपि, नाम नामधेयं, क्रमः पौर्वापर्य्यं, अभिजनः कुलञ्च ते, अज्ञाता अविदिता नामक्रमाभिजना येषां तान्, एतान् वृद्धानित्यर्थः । स्वतः स्वयं कथमभिवादयिष्ये प्रणमामि । एतेषां मध्ये कः खल्वधिको गुरुः, को वा ततोऽन्यून इति प्रणामविषये गुरुत्वपौर्वापर्य्यं न जानामि; येन तदनुसारेणाभिवादनं स्यात् नवा नाम जानामि, येन शर्म्मवर्म्मात्मनामज्ञानेन ब्राह्मणक्षत्रियनिश्चयात् तत्क्रमेण नमस्कारः स्यात्; नवा कुलं जानामि, येन प्रधानकौलीन्यानुसारेणादि प्रणामः सम्भवेत्; आत्मबुद्धिनिश्चितक्रमानुसारेण नमस्कारे तु वैपरीत्यस्यापि सम्भवात् मूर्खता प्रकाशते; तदत्र किं करोमीति भावः । पुनः किन्तु, अयं मनसा निर्धीयमानः प्रकारः कल्पः रीतिरिति यावत्, अविरुद्धः लोके शास्त्रे च अनिन्दनीय इत्यर्थः । वो युष्माकं, प्रणामपर्य्यायः पर्य्यायेण नमस्कारः पूज्यताक्रमेण अभिवादनमिति यावत् । नमस्काररीतयो मनुसंहितादौ द्रष्टव्याः ।

(घ) अरु इति । आयुष्मान् प्रशस्तायुर्दीर्घायुरित्यर्थः ।

(ङ) कौशेति । जात ! सन्तान ! पुत्रकेत्यर्थः ।

(च) अरु इति । दिष्ट्या भाग्येन । उत्सङ्गः क्रोडः । मनोरथः सीतायाः पुत्रं क्रोडे करिष्यामीत्यभिलाषः ।

---

(१) ताद ! मे चिरं जीव इति पाठभेदः । (२) उत्सङ्गे कृत्वा अपवार्य्य । क्रोडे कृत्वा । उत्सङ्गे गृहीत्वा । इति त्रयः पाठभेदाः ।

कौश । जाद ! इदोवि दाव एहि । उत्सङ्गे कृत्वा । (१) अम्महे ! ण केवलं दरविअसन्तणीलुप्पलसामलुज्जलेण देहबन्धेण कवलिदारविन्दकेसरकसाअकण्ठकलहंसणिणाददीहदीहरेण सरेण अ रामभद्दसणुहरदि । णं कठिण- (१) कमलगब्भपक्खलो सरीरप्फंसोवि तादिसो ज्जेव वच्छस्स ।

(क) जात ! इतोऽपि तावदेहि । अहो ! न केवलं दरविकसन्नीलोत्पलश्यामलोज्ज्वलेन देहबन्धेन कवलितारविन्दकेसरकषायकण्ठकलहंसनिनाददीर्घदीर्घेण स्वरेण च रामभद्रमनुहरति, ननु कठिनकमलगर्भपक्ष्मलः शरीरस्पर्शोऽपि तादृश एव वत्सस्य ।

(ख) कौशेति । इतोऽपि मम क्रोडेऽपि । केवलमत्रा एव क्रोडे स्थातव्यमिति नास्ति नियमः, ममाप्युत्सङ्गे किञ्चिदेहीति भावार्थः । उत्सङ्गे कृत्वा क्रोडे स्थापयित्वा ।

दरं अल्पं विकसत् प्रस्फुटत् यत् नीलोत्पलम् इन्दीवरं तद्वत् श्यामलः श्यामवर्णः, उन्नतः लम्बमानश्च तेन तथोक्तेन देहबन्धेन शरीरघटनेन अयं बालकः केवलं रामभद्रमनुहरति इति न ; अपितु, कवलिताः मुखमध्ये प्रवेशिता, ये अरविन्दकेशराः पद्मकिञ्जल्काः तैः कषायो मधुरः सुश्राव्य इति यावत् कण्ठः स्वरो यस्य स तथोक्तः, यः कलहंसः मधुरास्फुटध्वनिकारी राजहंसः तस्य निनादः शब्द इव दीर्घदीर्घो दीर्घप्रकारः तेन उच्चैःस्वरेणेत्यर्थः स्वरेण कण्ठध्वनिना च रामभद्रम् अनुहरति अनुकरोति ।

अत्र लुप्तोपमाद्वयम् ।

"दर (अव्य) ईषदर्थः ।" "कषायः (पुं) सुरभिः ।" "कण्ठः (पुं)⋯ध्वनिः ।" इति शब्दकल्पद्रुमः । औरभार्थकोऽपि कषायशब्दोऽत्र माधुर्य्यार्थे लाक्षणिकः ।

(१) क्रोडे कृत्वा । उत्सङ्गे गृहीत्वा । इति विभिन्नौ पाठौ ।

(१) कठोरेति पाठान्तरम् ।

जाद ! [१] पेक्खामि दाव दे मुहचन्दम् । (२) (चिबुकमुन्नमय्य निरूप्य सबाष्पाकूतम्) राएसि ! किं ण पेक्खसि, णिउणं णिरूविज्जमाणं से मुहं वच्छाए मुहचन्देण संवददि ज्जेव । [छ]

जन । पश्यामि सखि ! पश्यामि । [ज]

जात ! प्रेक्षे तावत्ते मुखचन्द्रम् । राजर्षे ! किं न प्रेक्षसे, निपुणं निरूप्यमाणमस्य मुखं वत्साया मुखचन्द्रेण संवदति एव ।

कवलो ग्रासः कृत इतीनन्तात् कवलशब्दात् कर्मणि क्तः ।

नन्वित्यवधारणे । कठिनः पूर्णावयवत्वात् दृढः यः कमलस्य पद्मस्य गर्भः बीजकोषः (बीखज, चाका इत्यादिप्रसिद्धः) तद्वत् पक्वान्तः कठिनकोमलः गौरत्वयुक्त इति भावः । तादृश एव रामभद्रतुल्य एव ।

अत्रापि लुप्तोपमाऽलङ्कारः ।

द्वितीयं जातेत्यादिवाक्यं वात्सल्यानुनयप्रार्थनाव्यञ्जकम् ।

चिबुकम् अधरनिम्नभागं, उन्नमय्य उत्तोल्य, बाष्पेण आनन्दाश्रुणा आकूतेन अभिप्रायेण अभिप्रायव्यञ्जकभङ्गिविशेषेण सह वर्त्तत इति सबाष्पाकूतं पुनराहेत्यर्थः ।

अस्य बालकस्य मुखं निपुणं सम्यक् पुङ्खं सूक्ष्मरूपेणेति यावत् निरूप्यमाणम् अवलोक्यमानं सत् वत्सायाः सीतायाः मुखचन्द्रेण सह संवदति एव आकृत्या सम्मिलत्येव, न तु किञ्चिद्वैषम्यं यातीत्येवशब्दार्थः ।

अत्र निपुणशब्दः सम्यक् पुङ्खार्थे लाक्षणिकः ।

(ज) जनेति । पश्यामि पश्यामीति अवधारणार्थे द्विरुक्तिः । पश्याम्येवेत्यर्थः ।

---

(१) जीव जाद इति भिन्नः पाठः । (२) मुहं इति क्वचित् पाठः ।

कौश। अम्मो! उम्मत्तीभूदं विअ मे हिअअं किम्पि चिन्तअन्तो बहु विप्पलवदि। [भ]

जन। निरूप्य। [ञ]

वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते
सम्पूर्णप्रतिबिम्बितेव[१]निखिला सैवाकृतिः सा द्युतिः।

(भ) अहो! उन्मत्तीभूतमिव मे हृदयं किमपि चिन्तयत् बहु विप्रलपति।

(भ) कौशेति। मे मम हृदयम् उन्मत्तीभूतमिव अस्मिन् बालके सीतारामयोराकृति-सौसादृश्यदर्शनात् उन्मादयस्तमिव सत् किमपि अनिर्वचनीयं चिन्तयत् बहु नाना-प्रकारं विप्रलपति विशेषेणासम्बद्धं ब्रवीति। सीता जीवति, तस्या एवायं पुत्र इत्यादिकं प्रकाशयतीति भावः।

(ञ) जनेति। निरूप्य विशेषेणावलोक्येत्यर्थः।

वत्साया इति। अस्मिन् शिशौ वत्सायाः सीतायाश्च रघूद्वहस्य रघुवंशधुरन्धरस्य रामचन्द्रस्य च निखिला समग्रा सैवाकृतिः तत्सदृश एवाकारः, सा द्युतिः तत्सदृश्येव देहकान्तिः सम्पूर्णम् अविकलं यथा स्यात्तथा प्रतिबिम्बितेव प्रतिफलितेव सती अभिव्यज्यते प्रकाशते। किञ्च सा वाणी तत् सदृशमेव वाक्यं, स एव विनयः तदनुरूप एव नम्रभावः, तथा असौ स एव सीतारामतुल्य एव सहजः स्वाभाविकः पुण्यानुभावः पवित्रो देहप्रभावः अभिव्यज्यत इत्यनेनान्वयः। तर्हि किं सीतारामयोरेवायं पुत्रः? तदपि न, बहुकालमेव सीताया अभावात्; हन्त! तदियं दुराशैवेत्याह हा हेति।

हा हा दैव! अदृष्ट! परिप्लवं सीतारामसमानाकृतिरयं बालकः कस्य पुत्र इति निर्णेतुमसामर्थ्यात् चञ्चलीभूतं मम मनः किं कथं केन हेतुनेत्यर्थः; उत्पथैः असम्भव-कल्पनामार्गैः धावति द्रुतं गच्छति। सीतायाः प्रागेवाभावात् सीतापुत्रोऽयमित्याशा दुराशैवेति भावः।

---

(१) सम्पूर्णप्रतिबिम्बनेव इति सम्पूर्णप्रतिबिम्बिनेव इति च पाठान्तरम्।

सा वाणी, विनयः स एव, सहजः पुण्यानुभावोऽप्यसौ,
हा हा दैव! किमुत्पथैर्मम मनः पारिप्लवं धावति॥२२॥

कौश। अत्थि दे मादा, सुमरसि वा तादं?। [ट]

लवः। नहि नहि। [ठ]

कौश। तदो कस्स तुमं?। [ड]

लवः। भगवतो वाल्मीकेः। [ढ]

(ट) अस्ति ते माता, स्मरसि वा तातम्?।

(ड) ततः कस्य त्वम्?।

अत्र अभिव्यज्यत इत्येकया क्रियया आकृति-द्युति-वाणी-विनय-पुण्यानुभावानां कर्त्तृतया अभिसम्बन्धात् तुल्ययोगितालङ्कारः। तथा सैवाकृतिः तत्सदृश्येवाकृतिरित्येवं सर्वत्र सादृश्याक्षेपात् असम्भवद्वस्तुसम्बन्धरूपाः पञ्च निदर्शनाः, तथा उत्पथैरिति भङ्ग्या गम्यस्य सीताया अभावस्याभिधानात् पर्यायोक्तञ्च एतेषामलङ्काराणामङ्गाङ्गि-भावेन सङ्करः। एवशब्दस्य सा द्युतिरित्यादौ सर्वत्रानुषङ्गेणान्वयाच्च नियमे अनियमाख्यदोषः।

रघुवंशे एतदनुरूपः श्लोको यथा—"रूपं तदोजस्वि तदेव वीर्य्य"मित्यादि।

"अनुभावः प्रभावेऽपि।" "चञ्चलं तरलञ्चैव पारिप्लवपरिप्लवे" इति चामरः।

अभिव्यज्यत इति कर्म्मकर्त्तरि प्रत्ययः।

शार्दूलविक्रीड़ितं वृत्तम्॥२२॥

(ट) कौशेति। स्मरसि वा तातमिति पितुरस्तित्वस्यैव भङ्ग्यन्तरेण प्रश्नः—

(ठ) लव इति। नहि नहीत्यवधारणे द्विरुक्तिः। माता नास्ति, तातञ्च न स्मरामीत्यर्थः।

(ड) कौशेति। ततस्तदा मातापित्रोरसत्त्व इत्यर्थः; कस्य त्वं कस्य तत्त्वावधानेन रक्षितस्त्वम् इत्यर्थः।

(ढ) लव इति। भगवतो वाल्मीकेस्तत्त्वावधानेन रक्षितोऽस्मीति वाक्यशेषः।

कौश । अइ ताद ! कहिदव्वं कहेहि । [ण]

लवः । एतावदेव जानामि । [त]

नेपथ्ये । भो भोः सैनिकाः ! एष खलु कुमारश्चन्द्रकेतुराज्ञापयति, न केनचिदाश्रमाभ्यर्णभूमिराक्रमितव्येति । [थ]

अरुन्धतीजनकौ । अये ! मेध्याश्वरक्षाप्रसङ्गादुपागतोवत्सश्चन्द्रकेतुरद्य द्रष्टव्य इत्यहो सुदिवसः । [१] [द]

(ण) अयि तात ! कथयितव्यं कथय ।

(ण) कौशेति । कथयितव्यं यदस्ति तत् कथयेत्यर्थः, नतु गोपयेति भावः ।

(त) लव इति । एतावदेव जानामि, नतु एतदतिरिक्तं मातापितृविषयकं किमपि जानामीति भावः ।

(थ) नेपथ्य इति । केनचित् केनापि जनेन आश्रमस्य वाल्मीकेस्तपोवनस्य अभ्यर्णभूमिः निकटवर्त्ति स्थानम् । तरुलताविनाशादिना तपोवनक्षतिनिवारणार्थं मुनीन् प्रति सम्मानप्रदर्शनार्थञ्च उक्तिरियम् ।

"उपकण्ठान्तिकाभ्यर्णा" इत्यमरः ।

(द) अरु इति । अये इति सन्निहितजनसम्बोधनम् । मेध्यः हिंसनीयः अश्वमेधयज्ञे छेदनीय इति यावत् योऽश्वस्तस्य स्वेच्छया विचरत इत्यर्थः रक्षाप्रसङ्गात् अपराक्रमणकारिजननिवारणेन पालनार्थमित्यर्थः । द्रष्टव्यः अस्माभिरिति शेषः । इति हेतोः, अहो प्रशस्तः अयं सुदिवसः शुभदिनम् । यत्र प्रियजनदर्शनादिना महानानन्दो भवेत् तत् शुभदिनमेवेति भावः ।

"अहो । (व्य) ·· प्रशंसा" इति शब्दकल्पद्रुमः ।

---

(१) द्रष्टव्यः, अहो सुदिवसः । इति पाठान्तरम् ।

कौश । वच्छलक्खणस्स पुत्तको आणवेदित्ति अमिअविन्दु-सुन्दराइं अक्खराइं सुणीअन्ति । [ध]

लवः । आर्य्य ! क एष चन्द्रकेतुर्नाम ? । [न]

जन । जानासि रामलक्ष्मणौ दाशरथी ?। [प]

लवः । एताविव [१] रामायणकथापुरुषौ ? । [फ]

जन । अथकिम् । [] [ब]

(ध) वत्सलक्ष्मणस्य पुत्रक आज्ञापयतीति अमृतविन्दुसुन्दराणि अक्षराणि श्रूयन्ते ।

(ध) कौशि.ते । अमृतस्य बिन्दवः कणा इव सुन्दराणि मधुराणि श्रुतिसुखकराणी-त्यर्थः, अक्षराणि वचनानि । पीतस्याप्याधिपत्यश्रवणे कस्य न सुखं जायते इति भावः । अत्र लुप्तोपमाऽलङ्कारः ।

(न) लव इति । चन्द्रकेतुर्नाम चन्द्रकेतुरिति नाम्ना प्रसिद्धः ।

(प) जनेति । दशरथस्यापत्ये पुमांसाविति दाशरथी । काकुवशात् प्रश्नो व्यज्यते, जानासि किमित्यर्थः ।

(फ) लव इति । एताविव दाशरथी एव न तु अपराविति एवशब्दार्थः, रामलक्ष्मणौ रामायणकथायाः वाल्मीकिकृतरामायणनामकाख्यानस्य पुरुषौ प्रधानपात्रभूतौ किमि-त्यर्थः । अत्रापि काकुवशात् प्रश्नो व्यज्यते ।

(ब) जनेति । अथकिमिति स्वीकारसूचकमव्ययम् । (हाँ इति बङ्गभाषा । और क्या इति हिन्दी भाषा) ।

---

(१) तादृशाविति पाठभेदः ।

(२) तत् कथं न जानासि लक्ष्मणस्यायमात्मजश्चन्द्रकेतुरिति विभिन्नः पाठः, किन्तु तत्पाठे तौ कथं न जानासीति परवाक्यं नास्ति ।

लवः । तौ कथं न जानामि । (भ)

जन । तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः । (म)

लवः । ऊर्म्मिलापुत्रस्तर्हि मैथिलस्य राजर्षेर्दौहित्रः । (य)

अरु । विहस्य । आविष्कृतं कथाप्रावीण्यं वत्सेन । (१) (र)

जन । विचिन्त्य । यदि त्वमीदृशः कथायामभिज्ञस्तद् ब्रूहि तावत्, पृच्छामस्तेषां दशरथात्मजानां किन्नामधेयान्यपत्यानि केषु केषु दारेषु प्रसूतानि । (२) (ल)

(भ) लव इति । तौ रामलक्ष्मणौ । अतीवप्रथितत्वात् अधीतरामायणाख्यानस्य प्रधानपात्रत्वाच्च जानाम्येवेति भावः ।

(म) जनेति । तस्य प्रथितनाम्नः । आत्मजः पुत्रः ।

(य) लव इति । तर्हि चन्द्रकेतोर्लक्ष्मणस्यात्मजत्वे सति, स चन्द्रकेतुरित्यर्थः ऊर्म्मिलायास्तदाख्यलक्ष्मणभार्य्यायाः पुत्रः लक्ष्मणस्य दारान्तराश्रवणादिति भावः, मैथिलस्य मिथिलानगरीपतेः राजर्षेर्जनकस्य ।

(र) अरु इति । वत्सेन लवेन, कथाया रामायणाख्यानस्य प्रावीण्यम् अभिज्ञत्वम्, आविष्कृतं प्रकटितं, चन्द्रकेतोर्मातृपितृमातामहानां यथावदुक्तत्वादिति भावः । एतेन बालकोऽयमतीव मेधावीत्याश्चर्य्यमिति वस्तुना वस्तुध्वनिः ।

(ल) जनेति । किं नामधेयं नाम येषां तानि, अपत्यानि सन्तानाः, दारेषु भार्य्यासु, प्रसूतानि उत्पन्नानि । सूधातोरकर्म्मकत्वविवक्षया कर्त्तरि क्तः । यदि बालको-ऽयं दशरथात्मजानामपत्यविवरणप्रसङ्गेन 'रामात् सीतायामुत्पन्नोऽहं'मिति वदेत् तदा अनायासेनैव ज्ञातव्यविज्ञानं स्यादित्यभिप्रायेणायं प्रश्नः ।

---

(१) कुमारेणेति पाठान्तरम् ।

(२) कस्मिंश्चित् पुस्तके केषु केष्विति द्विरुक्तिर्नास्ति ।

लवः। नायं कथाप्रविभागोऽस्माभिरन्येन वा श्रुतपूर्वः। (ब)

जनः। किं न प्रणीत एव कविना ?। (श)

लवः। प्रणीतो न तु प्रकाशितः। तस्यैव खलु कोऽप्येकदेशः सन्दर्भान्तरेण रसवानभिनेयार्थः कृतः, तच्च स्वहस्तलिखितं मुनिर्भगवान् व्यसृजद्भरतस्य मुनेस्तौर्य्यत्रिकसूत्रकारस्य। (ष)

(ब) लव इति। अयं भवता पृच्छ्यमानः रामादीनामपत्यविवरणरूपः कथाप्रविभागः आख्यानांशः। अन्येन मद्भिन्नजनेन। अस्माभिः साक्षात् न श्रुतः, अन्यस्यापि श्रवणाभावात् परम्परयापि न श्रुत इति नोत्तरं दातुमस्य समर्थ इति भावः।

(श) जनेति। कविना वाल्मीकिना, प्रणीतो विरचितः। किन्तु प्रणीत एव न तु त्वया श्रुत इत्येवशब्दार्थः।

(ष) लव इति। प्रकाशितः समक्षं नीतः श्रुतिविषयं प्रापितो वा। तस्यैव रामादीनामपत्यविवरणांशस्यैव नतन्यस्येत्येवशब्दार्थः, एकदेशः अवान्तरांशः केवलरामसन्ततिविवरणांश इत्यर्थः इति बोध्यं सन्दर्भान्तरेण अन्येन केनचित् प्रबन्धेन अश्वमेधविवरणेन सहेत्यर्थः इति ज्ञेयं, प्रचुरकरुणाद्भुतरसान्वितः अभिनेयः अभिनययोग्यः अर्थः वस्तु स्वरूपमिति यावत् यस्य स अभिनेयार्थः किमप्येकं दृश्यकाव्यमित्यर्थः कृतः। आद्योपान्तमेव रामचरितमादाय रामायणाभिधानं किमपि श्रव्यं महाकाव्यमुपनिबद्धं, अधिकन्तु तदन्तर्गतं सीतानिर्वासनादिपुनःसंयोगान्तमंशमादाय किमपि दृश्यकाव्यं प्रणीतमिति निष्कर्षः छात्रैर्बोद्धव्यः। इदन्तु अस्यैव नाटकस्य सप्तमाङ्कानुसारेणोक्तं रामायणे तु अन्यथा द्रष्टव्यम्। मुनिः वाल्मीकिः। स्वहस्तलिखितं नतु शिष्यादिनेत्यर्थः। एतेन तदंशस्य गोपनीयत्वं व्यज्यते। तौर्य्यत्रिकस्य नृत्यगीतवाद्यस्य सूत्रकारः व्यवस्थापकग्रन्थकारस्तस्य भरतस्य तदाख्यस्य मुनेः समीप इत्यर्थः व्यसृजत् प्रेरितवान्।

"तौर्य्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रय"मित्यमरः। "तूर्य्यं मुरजादि तत्र भवं तौर्य्यम्। तौर्य्योपलक्षितं त्रिकमिति तौर्य्यत्रिक"मित्यमरटीकायां महेश्वरः।

जन । किमर्थम् ? । (स)

लव: । स किल भगवान् भरतस्तमप्सरोभिः प्रयोजयिष्यतीति । (ह)

जन । सर्वमिदमस्माकमाकूतकरम् । (च) (१)

लव: । महती पुनस्तस्मिन् भगवतो वाल्मीकेरास्था, केषाञ्चिदन्तेवासिनां हस्तेन तत् पुस्तकं भरताश्रमं प्रति प्रेषितम् (२) । तेषामानुयात्रिकश्चापपाणिः प्रमादापनोदनार्थं (३) अस्मद्भ्राता प्रेषितः । (क)

(स) जनेति । किमर्थमिति व्यमृजदितिक्रियाविशेषणम् ।

(ह) लव इति । तमेकदेशम् । अप्सरोभिरभिनेतृभिरित्यर्थः । प्रयोजयिष्यति अभिनाययिष्यति, इति उतोर्व्यसृजदित्यन्वय: ।

(च) जनेति । इदं त्वयोक्तं सर्वं तदंशस्य दृश्यकाव्यरूपेण विरचनं स्वहस्तेन लेखनं भरतान्तिके प्रेरणञ्चेत्यर्थः । आकूतकरं कौतुकजनकम् । तत्र कस्यापि महाद्भुतस्य स्थितिसम्भवादिति भावः ।

(क) लव इति । तस्मिन् गुप्ते दृश्यप्रबन्धे । आस्था यत्न आदर इति यावत् । महती आस्था इति कथमवगतमित्याह केषाञ्चिदिति । अन्तेवासिनां छात्राणाम् । अनु पश्चात् यात्रायां गमने नियुक्त इत्यानुयात्रिकः अनुगामीत्यर्थः । चापपाणिः कार्मुकहस्तः । प्रमादस्य अनवधानतायाः अनवधानताजन्यविपत्तेरित्यर्थः अपनोदनार्थं

---

(१) तत् सर्वमस्माकमिदमाकूतकरमिति पाठान्तरम् ।

(२) 'कस्मिंश्चित् पुस्तके 'प्रति' शब्दो नास्ति ।

(३) अप्रमादार्थमिति पाठान्तरम् ।

कौश। जाद ! भादावि दे अत्थि ?। (ख)

लवः। अस्ति आर्य्यः कुशो नाम। (ग)

कौश। जेट्‌ठोत्ति भणिदं होदि। (घ)

लवः। एवमेतत्, प्रसवक्रमेण स किल ज्यायानिति। (ङ)

जन। किं यमजावायुष्मन्तौ ?। (च)

लवः। अथकिम्। (छ)

(ख) जात ! भ्रातापि ते अस्ति ?।

(घ) ज्येष्ठ इति भणितं भवति?।

दूरीकरणार्थं दस्युतस्करादिहिंस्रप्रश्ननिवारणार्थमित्यर्थः। चापपाणिरित्यनेन प्रमादापनोदनार्थमित्यनेन च भ्रातुर्वीरत्वविस्मयकारित्वप्रकाशादमीषां वृत्तान्तज्ञानं प्रति कौतुकं वर्द्धितम्।

"आख्यानीयवयोराख्य।" इत्यमरः।

(ग) लव इति। आर्य्यः पूज्यः। एतेन ज्येष्ठत्वं व्यज्यते।

(घ) कौशेति। ज्येष्ठ इति भणितम् उक्तं भवति, स किं त्वत्तो ज्येष्ठ इत्यर्थः।

(ङ) लव इति। प्रसवस्य क्रमेण पौर्वापर्य्येण स कुशः ज्यायान् ज्येष्ठः। इतिशब्दो वाक्यसमाप्तौ। यमजयोः प्राक् प्रसूतस्य ज्येष्ठत्वमाह देवलः।

"वद्दिवंशेषु चारित्वात् यमयोः पूर्वजन्मतः।
यस्य जातस्य यमयोः पश्यन्ति प्रथमं मुखम्।
सन्तानः पितरश्चैव तस्मिन् ज्येष्ठ्यं प्रतिष्ठितम्।"

"जन्मप्राथम्यात् ज्येष्ठं यमजयोर्न तु निषेकप्राथम्या"दिति स्मार्त्तश्च।

(च) जनेति। आयुष्मन्तौ युवां किं यमजौ युग्मजातौ।

(छ) लव इति। अथकिं सत्यमित्यर्थः। कुशलवेति नामकारणं तयोर्मन्त्रवस्तु रामायणम् ...

जन। कथय, कथाप्रबन्धस्य कीदृशः पर्य्यन्तः। (ञ)

लवः। अलीकपौरप्रवादोद्विग्नेन राज्ञा निर्व्वासितां देवयजनसम्भवां सीतादेवीमासन्नप्रसववेदनामेकाकिनीमरण्ये परित्यज्य लक्ष्मणः प्रतिनिवृत्त इति। (झ)

"यस्तयोः प्रथमं जातः स कुशैर्मन्त्रसंस्कृतैः।
निर्म्मार्जनीयो नाम्ना हि भविता कुश इत्यसौ॥
यश्चावरज एवासीत् लवनेन समाहितः।
निर्म्मार्जनीयो वृद्धाभिर्नाम्ना स भविता लवः।
एवं कुशलवौ नाम्ना यमौ तौ संबभूवतुः।
भगवत्कृतनामानौ सुखिनावभवतौ च तौ॥"

(ञ) जनेति। कथाप्रबन्धस्य रामायणाख्यसन्दर्भस्य पर्य्यन्तः शेषभागः। यदि च 'सीताया अपत्यं जातं, तच्च एवमेव परिपालितं परिवर्द्धितञ्च इत्यंशोऽपि सत् कथापर्य्यन्तमध्ये परिगणितः स्यात्, तदापि तत्कथनेन ज्ञातव्यज्ञानं स्यादित्यभिप्रायेणैव नन्वयुक्तिरिति बोध्यम्।

(झ) लव इति। अलीकः अयथार्थो यः पौराणां प्रवादोऽपवादः तेन उद्विग्नेन अस्थिरचित्तेन कार्य्याकार्य्यविवेकशून्यमनसेत्यर्थः। राज्ञा रामचन्द्रेण निर्व्वासितां परिवर्ज्जितां। आसन्ना सन्निहिता उपस्थितप्रायेत्यर्थः प्रसववेदना यस्यास्ताम्। परित्यज्य रथादवतार्य्य। प्रतिनिवृत्तः पुनरयोध्यां गतः। इति एष कथाप्रबन्धस्य पर्य्यन्त इत्यर्थः।

"अलीकन्त्वप्रियेऽनृते" इत्यमरः।

कौश । हा वच्छे ! मुद्धचन्दमुहि ! को दाणिं दे कुसुमभूदस्स सरीरस्स (१) देव्वदुव्विलासपरिणामो एअलिआए णिवड़िदो । (अ)

जन । हा वत्से ! ।

नूनं त्वया परिभवश्च नवश्च घोरं
ताञ्च व्यथां प्रसवकालकृतामवाप्य ।

(अ) हा वत्से ! मुग्धचन्द्रमुखि ! क इदानीं ते कुसुमभूतस्य शरीरस्य दैवदुर्विलासपरिणाम एकलिकाया निपतितः ।

(अ) कौशेति । मुग्धः सुन्दरो यश्चन्द्रः स इव मुखं यस्यास्तत्सम्बोधनम् । कुसुमभूतस्य पुष्पतुल्यस्य अतीवकोमलस्येत्यर्थः । कोऽनिर्वचनीयः अतीवभयङ्कर इत्यर्थः दैवस्य नियतेः दुष्टो दुःखदायी विलासो व्यवहारो यस्मिन् स चासौ परिणामः शेषावस्था चेति स तथोक्तः । जगति सुखं दुःखं वा दैवस्यैव कार्य्यं, लोकस्तत्र निमित्तमात्रमिति भावः । एकलिकाया एकाकिन्याः, सहायसत्त्वे दुःखं वायसपि सह्यं स्यादिति भावः । निपतित उपस्थितः आसीदिति शेषः । भूत (त्रि) सदृशं । एकलः (त्रि) एकाकी । एकला इतिभाषेति च शब्दकल्पद्रुमः ।

एकलिकेति एकलाशब्दादनुकम्पायां कप्रत्ययः ।

नूनमिति । हा वत्से ! त्वया नवं नूतनम् इतः पूर्व्वं कदापि न त्वया ईदृशः परिभवोऽनुभूत इति भावः, घोरं दारुणञ्च लोकैः चरित्रदोषापवादादधिको भयङ्करश्च अपवादो नास्तीति भावः, परिभवं निर्वासनात् तिरस्कारं अपमानमित्यर्थः, तथा प्रसवकालिन कृतां तां सर्वत्र प्रसिद्धां व्यथां वेदनाञ्च अवाप्य अनुभूय क्रव्यादगणेषु म सभोजिश्वापदजन्तुसमूहेषु परितः सर्वतः परिवारयत्सु परिवेष्टमानेषु सत्सु, सन्त्वया

(१) सरीरकुसुमस्स इति पाठान्तरम् ।

क्रव्यादगणेषु परितः परिवारयत्सु
सन्नस्त्वया शरणमित्यसकृत् स्मृतोऽस्मि ॥ २३ ॥

लवः। अरुन्धतीं प्रति। आर्य्ये! कावेतौ?।

अरु। इयं कौशल्या, अयं जनकः।

लवः। सबहुमानखेदकौतुकं पश्यति। (ट)

अतिविभीतया सत्या अम्ब अहं शरणं रक्षिता इति कृत्वा भयेषु नितान्तवात्सल्येन पित्रादिरेव प्राथमिकशरणस्य सार्वलौकिकत्वादिति भावः नूनं निश्चितम् असकृत् वारं वारं स्मृतः चिन्तितः अभवमित्यर्थः। हा पितः! रक्ष रक्ष मां इत्यादि बहुशः क्रन्दितवतीति निष्कर्षः। यद्यपि भयेषु लोकैः मातापि अर्थ्यते आह्वयते च तथापि सीतया मातुः पृथिव्या जडत्वेन तत्स्मरणमनर्थकमिति जनकमात्रमेव स्मृतमिति बोध्यम्।

पदार्थानां प्रस्तुतानामिति बहुवचनस्याविवक्षितत्वात् अत्र अवाप्येत्येकया क्रियया व्यथापरिभवयोः कर्मतयाऽभिसम्बन्धात् तुल्ययोगिताऽलङ्कारः। किन्तु ननु नन्द- सत्वेऽपि नोत्प्रेक्षा, प्रकृतस्य परात्मना सम्भावनाया एव उत्प्रेक्षारूपत्वात्, अत्र तु करवस्यैव वास्तविकत्वेन तादृशसम्भावनाया एवाभावादिति ध्येयम्। किञ्च व्रतीद- चरणौ परिपरीणि सङ्गत साम्यात् छेकानुप्रासश्चेति संसृष्टिः। घोरं भवञ्चेति चकारौ घोरनवयोः समुच्चये, अपरौ चकारौ तु इतरेतरयोगे; तेन न निरर्थकत्वदोषः स्यात्। मांसाशिनि ति इति शब्दकल्पद्रुमः। असकृदिति बहुमर्थे अव्ययम् इति मल्लिनाथः। शरणं गृहरक्षित्रोरित्यमरः।

वसन्ततिलका वृत्तम्॥२३॥

(ट) लव इति। बहुमानः महापुरुषस्य रामस्य मातृत्वात् श्वशुरत्वाच्च प्रति- गौरवं, कौशल्याजनकयोर्विषाददर्शनात् खेदो विषादः, रामायणवर्णितमहोदार- चरितयोः कौशल्याजनकयोः साक्षाद्दर्शनात् कौतुकं; तैः सहेति सबहुमानखेद- कौतुकम्।

जन। अहो! दुर्मर्य्यादता दुरात्मनां पौराणाम्, अहो! रामस्य राज्ञः क्षिप्रकारिता। (ठ)

एतद्वैशसघोरवज्रपतनं शश्वदमीत्पश्यतः
क्रोधस्य ज्वलितुं धगित्यवसरश्चापेन शापेन वा। (क)

(ठ) जनेति। अहो शब्दद्वयमसूयार्थे। दुरात्मनाम् अलीकापवादकारित्वेन पापदूषितचित्तानां पौराणां पुरवासिजनानां दुर्मर्य्यादता न्याय्यपथातिक्रमः। जनस्य हि परेषां यथार्थगुणकीर्त्तनमेव न्याय्यं विशेषतस्तु राजादेः, अत्र तु राजमहिष्या एव अलीकापवादकीर्त्तनमतीवान्याय्यं जातमिति भावः। रामस्य राज्ञः भूपतेः विशेषविवेचनापूर्वकसदसद्विचारानुसारेणैव दण्डविधातुः सत इत्यर्थः क्षिप्रकारिता शीघ्रकार्य्यकरणम् अविमृष्यकारितेत्यर्थः। तथा च रामो यदि पौराणामपवादोऽयमयथार्थो यथार्थो वा इति किञ्चिद्विलम्ब्य हर्द्धैः सह समालोच्य तत्त्वावधारणमकरिष्यत् तदा कथमपि सीता निर्वासिता नाभविष्यत्, अतएव लोकानामीकसावनिवहानुग्रहकर्त्तुः राज्ञ ईदृशी क्षिप्रकारिता सीतानिर्वासनरूपमनर्थं कारित्वा तदतीवदुःखावहेति भावः।

अहो (अ) असूया। मर्य्यादा (स्त्री) न्याय्यपथस्थितिरिति च शब्दकल्पद्रुमः।

दुर्दुष्टा राजमहिष्या एवालीकापवादकारित्वात् मर्य्यादा येषां ते दुर्मर्य्यादास्तेषां भावः दुर्मर्य्यादता।

अतः पौराणां रामस्य च दण्डविधानं मया कर्त्तव्यमित्याह एतदिति। एतत् सीतानिर्वासनरूपं यत् वैशसं हिंसा तदेव घोरवज्रपतनं दारुणवज्राघातः, तत् शश्वत् सदा उत्पश्यतः विजानतो मम क्रोधस्य चापेन धनुर्द्वारा शापेन अभिसम्पातद्वारा वा धगिति धक् इति शब्दं कृत्वा ज्वलितुं अवसरः समयः उपस्थित इति शेषः। इदानीमेव अकस्मात्कोऽस्त्याकस्य किमिरपि अलीकपौरापवादमात्रस्याय सीताऽनिर्वासन-कारणत्वकथनात् कादलीफलचौर्य्य वा प्राणदण्डकरणमिव नितान्ततुच्छकारणात् सीताया निर्वासनं हरणमिति निश्चयो जातः, सुतरामधुनैव अस्त्रेण वा शापेन वा सपौरं रामं निहन्मीति भावः।

कौश। भअवदि ! परित्ताहि परित्ताहि, पसादेहि कुविदं राएसिं। (ड)

अष्ट। एतद्धि परिभूतानां प्रायश्चित्तं मनस्विनाम्।

राजन्नपत्यं रामस्ते पाल्याश्च कृपणाः प्रजाः ॥२४॥

(ड) भगवति ! परित्रायस्व परित्रायस्व, प्रसादय कुपितं राजर्षिम्।

अत्र सीताहिंसने दस्युपतनत्वारोपात् निरङ्गं केवलरूपकमलङ्कारः। ज्वलितु-मित्यनेन क्रोधस्य वह्निरूपत्वं व्यज्यते।

विशसतीति छिनत्तीति विशसो हिंसकः पचाद्यच्, विशसस्येदं कार्य्यमिति वैशसं हिंसेति बोध्यम्। अविषयत्वाच्च चापस्य ऋषित्वाच्च शापस्योक्तिरिति ध्येयम्।

(ढ) कौशेति। प्रसादय कोपहीनं कुरु इत्यर्थः। तत्प्रसादनमेव परित्राणमिति भावः।

एतदिति। मनस्विनां प्रशस्तमनसां उच्चजनानाम् परिभूतानां अपमानितानां दुष्कार्य्यंकरणात् लोकैस्तिरस्कृतानां सतामित्यर्थः एतद्धि एतदेव ईदृशं पुनर्गुरुजन-कर्त्तृकाभंसनमेवेतितात्पर्य्यं प्रायश्चित्तं दोषक्षालनकारणमित्यर्थः। कश्चिन्मनस्विना प्रमादवशात् कस्मिंश्चिदपराधे कृते लोकतिरस्कृतमपि तं यदि पुनर्गुरुजना भर्त्सयन्ति, तदा तदेव तस्य योग्यो दण्डो भवति; अतो मिथ्यापौरापवादेन रामेण प्रमादात् सीता निर्वासितेति साधुजनास्त्वं पौरवर्गश्च निन्दन्त्येव तथापि यत् भवन्तोऽपि भर्त्सयन्ति, एतदेव रामस्य पौरवर्गस्य च महान् दण्डो जात इति भावः। विशेषतस्तु, हे राजन् ! रामस्ते तव अपत्यं जामातृत्वात् मित्रपुत्रत्वाच्च सन्तानरूपः, तथा प्रजाः पौरजनाः कृपणाः दीनाः क्षुद्रबुद्धय इति यावत् अतएव पाल्या रक्षणीयाः; सुतरां चापेन शापेन वा प्रायदण्डो नोचितः, किन्तु पौराणा-

जनः। शान्तं वा रघुनन्दने तदुभयं तत् पुत्रभाण्डं हि मे
भूयिष्ठद्विजबालवृद्धविकलस्त्रैणश्च पौरो जनः ॥२५॥

प्रविश्य सम्भ्रान्ता बटवः। कुमार ! अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेषु श्रूयते, सोऽयमधुनाऽस्माभिः प्रत्यक्षीकृतः। (ढ)

मलोकापवादापराधः रामस्य च सीतानिर्वासनापराधो भवता मार्जनीय इति भावः एतद्व्याख्यानस्य व्याख्यानान्तरस्य च सदसत्त्वं सुधीभिर्विवेचनीयम्।

अत्र पूर्वार्द्धे अप्रस्तुतात् मनस्विसामान्यात् प्रस्तुतस्य विशेषरामस्य प्रतीतेरप्रस्तुतप्रशंसाऽलङ्कारः रामभर्त्सने प्रायश्चित्तत्वारोपात् निरङ्गं केवलरूपकञ्च तयोरेकाश्रयानुप्रवेशरूपः सङ्करः, द्वितीयार्द्धे च पदार्थहेतुकं काव्यलिङ्गमिति संसृष्टिः।

“पापक्षयमात्रसाधनत्वेन विधिबोधितं कर्म प्रायश्चित्तम्” इति आप्तः। “हि हेतावधारणे। कदर्य्यक्षुद्रकिम्पचानमितम्पचा” इति चामरः।

पथ्यावक्त्रं वृत्तम् ॥२४॥

शान्तमिति। रघुनन्दने रामे तदुभयं चापधारणं शापदानञ्च शान्तं विरतं भवत्विति शेषः, हि यस्मात् तत् राम इत्यर्थः प्रकाश्यमानलिङ्गत्वात् क्लीवत्वं पुत्रः पुत्रस्तस्य भाण्डं भाजनम्। यतः सत्यात् पुत्रसदृशो जनो न नाशयितुं शक्यत इति भावः। तथा पौरो जनः सीतायाः अलीकापवादप्रवर्त्तयिता पुरवासिवर्गश्च, भूयिष्ठाः प्रचुराः द्विजाः ब्राह्मणाः, बालाः बालकाः, वृद्धाः जरन्तः, विकलाः हीनेन्द्रियाः काणखञ्जादयः स्त्रैणं स्त्रीसमूहश्च यस्मिन् स तथोक्तः, अतः पौरेऽपि तदुभयं शान्तमित्यर्थः। अतएव पौरान्तर्गतब्राह्मणादीनामवध्यत्वात्, साधारणपौरोऽपि नाशयितुं न शक्यत इत्यगत्या क्षमैव कर्तव्येति भावः।

अत्र चतुर्थचरणे पदार्थहेतुकं काव्यलिङ्गमलङ्कारः।
ब्राह्मणादीनामवध्यत्वमनुसन्धेयं विस्तरभयादुपेक्षितम्।

शार्दूलविक्रीडितं वृत्तम् ॥२५॥

(ढ) प्रविश्येति। सम्भ्रान्ताः त्वरया व्यग्राः, बटवः ऋषिकुमाराः। अश्वोऽश्व

लवः । अश्वोऽश्व इति पशुसमाम्नाये सांग्रामिके च पठ्यते, तद्ब्रूत कीदृशः । (ग)

बटवः । श्रूयताम् । (त)

पश्चात् पुच्छं वहति विपुलं, तच्च धूनोत्यजस्रं
दीर्घग्रीवः स भवति; खुरास्तस्य चत्वार एव ।

इति वंशस्थां विवंचनम् । इति प्रसिद्धः । कोऽपि बतत्वात्तिरश्चाभिरदृष्टपूर्व इत्यर्थः; भूतविशेषः प्राणिविशेषः, जनपदेषु प्राकृतलोकालयदेशेषु, श्रूयते लोकपरम्परया शास्त्रे चेत्यर्थः । प्रत्यक्षीकृतः चक्षुषेति शेषः ।

अश्वस्य ग्राम्यपशुत्वादेव जनपदेष्वित्युक्तम् । तथाच पैठीनसिः गौरविरजोऽश्वोऽश्वतरो गर्दभो मनुष्यश्चेति सप्त ग्राम्याः पशवः ।

श्रुधातोः शाब्दबोधे शक्तिरिति नैयायिकमतानुसारेण अश्वोऽश्व इति कोऽपि भूतविशेषः श्रूयते इति प्रयोगः सङ्गच्छते; अश्वशब्दजन्यं ज्ञानं क्रियते इति तदर्थः । श्रवणेन्द्रियजन्यप्रत्यक्षे श्रुधातोः शक्तिरिति मीमांसकमते तु अत्र श्रुधातोस्तादृशशाब्दबोध एव लक्षणेति संक्षेपः ।

(ग) लव इति । पशुसमाम्नाये पशुनाम-संग्रहशास्त्रे प्रागुक्तपैठीनसिवचनादौ सांग्रामिके धनुर्वेदादौ युद्धशास्त्रे च । एतेनास्य शास्त्रज्ञानाधिक्यं व्यज्यते ।

धनुर्वेद इदानीं दुर्लभ एव, किन्तु तत्संग्राहकं भोजराजकृतयुक्तिकल्पतरुप्रभृति शास्त्रं दृश्यते । तथाच युक्तिकल्पतरौ--

ये शुद्धवर्णा भयवेगयुक्ता अग्न्यग्निभाजो बहुभोगिनश्च ।
अक्रोधशीलाः समरेऽतिहृष्टास्ते सात्त्विका भूपतुरङ्गमाः स्युः ॥

पश्चादिति । सः अस्माभिः प्रत्यक्षीकृतोऽश्वः पश्चात् देहपश्चाद्भागे विपुलं विशालं पुच्छं लाङ्गूलं वहति धारयति, तच्च पुच्छं अजस्रम् अविरतं धूनोति कम्पयति, दीर्घा लम्बमाना ग्रीवा गलो यस्य स तथोक्तो भवति, तथा तस्य अश्वस्य चत्वार एव खुराः । तथा शष्पाणि नूतनतृणानि अत्ति खादति, तथा दासस्य च तत्फलस्येव मात्रा प्रत्येकं

शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्
किं वाख्यातैर्व्रजति स पुनर्दूरमेह्येहि यामः ॥२६॥

इत्युपसृत्याजिने हस्तयोराकर्षन्ति। (त)

लवः। सकौतुकोपरोधविनयम्। आर्य्याः! पश्यत पश्यत, एभिर्नीतोऽस्मि। इति त्वरितं परिक्रामति। (थ)

(आम्र)परिमाणं येषां तान् आम्रमात्रान् शकृत्पिण्डकान् गूथपिण्डान् प्रकिरति विसृजति। आख्यातैस्तस्याकृतिवर्णनैः किं वा फलम् अपि तु किमपि नेत्यर्थः, पुनः किन्तु सः अश्वः दूरं व्रजति वर्णनकालमध्य एव विप्रकृष्टो भवतीत्यर्थः, अतएव एह्येहि आगच्छागच्छ यामो गच्छामस्तमवलोकयितुमित्यर्थः।

अत्र वहतिप्रभृतीनामनेकक्रियाणां सोऽश्व इत्येककर्तृकारकत्वात् दीपकमलङ्कारः, स च उपमाऽर्थापत्तिकाव्यलिङ्गैः स्वभावोक्त्या च सङ्कीर्य्यते। तथा पूर्वापरकर्तृप्रयोगमध्ये खुरास्तस्य चत्वार एव इति सम्बन्धनिर्देशात् प्रक्रमभङ्गदोषः, किञ्च एवशब्दोपादानात् अनियमे नियमाख्यदोषश्च, खुरान् वेदसंख्यान् बिभर्तीति पाठेन तयोः समाधानं स्यात्।

ईदृशस्थानविशेषे निवेशनेन श्रोतृणामयं श्लोकः परमचमत्कारमावहति। प्रहेलिकावदिममपि प्रायेण पृच्छन्ति च बालकाः।

मन्दाक्रान्ता वृत्तम् ॥२६॥

(त) इतीति। उपसृत्य आसन्नीभूय, अजिने उत्तरीयभूतमृगचर्मणि हस्तयोः करयोश्च गृहीत्वा आकर्षन्ति लवं बटव इति शेषः।

(थ) लव इति। कौतुकम् अश्वदर्शनकौतूहलम्, उपरोधो बालकानामनुरोधः, विनयो गमनानुमतिप्रार्थनया निर्लज्जत्वपरिहारस्तैः सह विद्यमानमिति तत् तथोक्तम्। आर्य्याः पूज्याः। एभिर्बालकैः नीतोऽस्मि, न त्वहं युष्माननादृत्य स्वेच्छया गच्छामि, अत्र किं ब्रुवन्ति भवन्त इति भावः।

अरुन्धतीजनकौ। पूरयतु कुतूहलं वत्सः। (द) (१)

कौश। भअवदि! जाणामि, एदं अणालोअअन्ती ण जीआमि विअ, अदो अण्णदो भविअ पेक्खह्म दाव गच्छमाणं दीहाउं (ध)

लव। अतिजवेन दूरमतिक्रान्तः स चपलः, कथं दृश्यते (२)। (न)

प्रविश्य कञ्चुकी। भगवान् वाल्मीकिराह, ज्ञातव्यमेतदवसरे भवद्भिरिति। (प)

(ध) भगवति! जानामि, एतमनालोकयन्ती न जीवामीव, अतोऽन्यतो भूत्वा पश्यामस्तावद्गच्छन्तं दीर्घायुषम्।

(द) अथ इति। कुतूहलम् आत्मनोऽस्यावलोकनकौतुकमित्यर्थः। यातुमिच्छसि याहीति भावः।

(ध) कौशीति। जानामि बुध्ये अनुमानं करोमीति यावत्। एतं बालकम्। अन्यतो भूत्वा अन्यत्र गता भूत्वा दर्शनयोग्यस्थाने गत्वेत्यर्थः। दीर्घायुषं चिरायुर्विशिष्टमिमं बालकम्।

(न) अथ इति। चपलः चञ्चलप्रकृतिः स बालकः अतिजवेन महावेगेन दूरं पन्थानम् अतिक्रान्तः अतीत्य गतः, अतएव कथं दृश्यते द्रष्टुं शक्यते त्वयेतिशेषः, चक्षुर्विषयातिक्रमादिति भावः।

(प) प्रविश्येति। एतत् कस्यायं बालक इति युष्माभिर्जिज्ञास्यं इदम्। अवसरे यथासमये। इति एवं वाक्यं वाल्मीकिराहेत्यर्थः। नैतदिदानीं वक्तव्यमिति भावः।

---

(१) कौतुकं वत्स इति पाठान्तरम्।

(२) कथं दृश्यत इति पाठः पुस्तकान्तरे नास्ति।

जन। अतिगम्भीरमेतत् किमपि भविष्यति।' भगवत्यरुन्धति! सखि कौशल्ये! आर्य्यगृष्टे! स्वयमेव गत्वा भगवन्तं प्राचेतसं पश्यामः। (फ)

इति निष्क्रान्तो वृद्धवर्गः।

बटवः। पश्यतु हि कुमारस्तदाश्चर्य्यम् (ब)

लवः। दृष्टमवगतञ्च नूनमाश्वमेधिकोऽयमश्व इति। (भ)

बटवः। कथं ज्ञायते?। (म)

लवः। ननु मूर्खाः! पठितमेव युष्माभिस्तत्काण्डे। किं न पश्यथ प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निष-

---

(फ) जनेति। एतत् कस्यायं पुव इत्यस्माभिर्ज्ञास्यं दृत्तं विषय इति यावत्, अतिगम्भीरं दुरवगाहं दुर्बोधमित्यर्थः, अतएव किमपि अनिर्वचनीयम्। अत भवतु तावदिति वाक्यं मन्तव्यम्। स्वयमिति बहुवचनान्तं पदं स्वयं स्वयमेवेत्यर्थः न तु प्रतिनिधिभिरित्यवधारणार्थः, तथात्वे अनादरप्रकाशेन महर्षेर्गौरवहानिः कृता स्यादिति भावः। प्राचेतसं वाल्मीकिम्।

(ब) बटव इति। कुमारो लवो भवान्। तदाश्चर्यं तमद्भुतमश्वमित्यर्थः। यो हि यत्प्रथमं पश्यति, स तदाश्चर्य्यमेव मन्यत इति बोध्यम्। हिशब्दोऽवधारणे, पश्यत्वेव नतूपेक्षस्वेत्यर्थः।

(भ) लव इति। दृष्टं युष्माभिरुच्यमानं तदाश्चर्यं तदश्वरूपमद्भुतं वस्तु मयवलोकितं तथा अयमश्वः नूनं निश्चितं अश्वमेधो यज्ञः प्रयोजनमस्येति आश्वमेधिको भवेदित्यर्थः। इति अवगतं बुद्धञ्च मयेति शेषः। नूनमिति भवेदित्यध्याहार्य्यक्रियाया विशेषणम्।

(म) बटव इति। कथं केनप्रकारेणेत्यर्थः।

(य) लव इति। तत्काण्डे अश्वमेधपरिपाटीकथनप्रकरणे पठितमेव तदपि विस्मृतमिव पुनः प्रश्नकरणात् मूर्खत्वमिवख्यातीति भावः। एक नैवाम् प्रतीति

क्षिणश्च रक्षितारस्तत्प्रायमेवेदमपि दृश्यते, यदीह न प्रत्यय-स्तदुगत्वा पृच्छत। (य)

वटवः। भो भोः! किम्प्रयोजनोऽयमश्वः परिवृतः पर्य्यटति?। (र)

लवः। सस्पृहमात्मगतम्। अये! अश्वमेध इति विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रियपरिभावी महानुत्कर्ष-निकषः। (ल) (१)

प्रत्येकं, शतं सङ्ख्या येषां ते, कवचं वर्म्म एषामस्तीति कवचिनः असियोद्धारः, दण्डी यष्टिरेषामस्तीति दण्डिनः दण्डयोधिनः, निषङ्गस्तूणीरमेषामस्तीति निषङ्गिणो धनुर्द्धराश्च रक्षितारः अश्वस्य रक्षका विद्यन्त इति शेषः तेषां प्रायो बाहुल्यं यत्र तत् तत्प्रायं, इदमपि बलम्। अत एवायमश्वमेधीयोऽश्व इति निश्चीयत इति भावः। इह मम वाक्ये न प्रत्ययो न विश्वासो यदि युष्माकमभूदित्यर्थः, तत् तदा, पृच्छत सैन्यान् जिज्ञासध्वं यूयमित्यर्थः।

"निषङ्ग्यस्त्री धनुर्द्धरः"। "प्रायोभूम्न्यन्तगमने" इति चामरः।

एतेन अन्यऋषिकुमारेभ्यो लवस्य मेधावित्वं व्यज्यते।

(र) वटव इति। भो भो इति सैन्यसम्बोधने, किं प्रयोजनं यस्य सः, परिवृतः सैन्यैः परिवेष्टितः पर्य्यटति भ्रमति।

(ल) लव इति। स्पृहया अश्वमेधेच्छया सहेति सस्पृहम्। लवश्च क्षत्रियत्वादा-दावेव अश्वमेधकरणकामना जाता, तथा च योहि यज्जातीयः, सः अङ्कुर एव 'तद्भाव' मनक्तीति बोध्यम्। विश्वं भुवनं विजयन्त इति विश्वविजयिनस्तेषाम्। ऊर्ज्जो बलमस्या-स्तीति ऊर्ज्जस्वलो बलवान् अन्यैरनिरोधनीय इत्यर्थः। सर्वान् क्षत्रियान् परिभवितुं लङ्घयितुं तिरस्कर्त्तुमिति यावत् शीलं यस्य स सर्वक्षत्रियपरिभावी सकलक्षत्रियपराज-

---

(१) उत्कर्षनिकष इति पाठान्तरम्।

नेपथ्ये । अयमश्वः पताकेयमथवा वीरघोषणा ।

सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ॥ २७ ॥

लवः । सव्यथमिव । अहो ! सन्दीपनान्यक्षराणि । (ब)

यचिह्नभूत इत्यर्थः । उत्कर्षस्य सर्वप्राधान्यस्य निकषः परीक्षास्थानमित्यर्थः । अश्वमेधस्य सार्वभौमानुष्ठेयतया तत्र क्षत्रियमात्रस्यैव स्पृहा जायत इति भावः । तथाच आपस्तम्बः—

राजा सार्वभौमोऽश्वमेधेन यजेत नाप्यसार्वभौमः ।

ऊर्जस्वल इति कृष्यादिभ्यो वलच् इति मत्वर्थे वलच् प्रत्ययः ।

स्वर्णपरीक्षकपाषाणे रूढस्य निकषशब्दस्यात्र परीक्षकमात्रे उपादानलक्षणा ।

वटुभिर्जिज्ञासितमर्थं केचिदश्वरक्षकाः सैनिका नेपथ्यादाहुः अयमिति । सप्तसु भूरादिषु लोकेषु भुवनेषु एकः अद्वितीयः वीरः शूरः तस्य, दशकण्ठकुलद्विषः रावणवंशविध्वंसिनो रामस्येत्यर्थः अयमश्वः अश्वमेधयज्ञीयो घोटकः, तथा इयञ्च पताका जयपताका वैजयन्ती; अथवा वीरघोषणा अश्वपताकात्मिका रामस्य वीरत्वप्रख्यापनवाणी ; अयमश्व इयञ्च पताका शास्त्रानुसरणात् सामान्यमात्रं यत्-किञ्चित्, किन्तु सप्तलोकमध्ये राम एव सर्वप्रधानो वीर इति घोषणैव मुख्यं प्रयोजनमित्यर्थः ।

अत्र अश्वपताकाभ्यां वीरघोषणाया भेदेऽपि अभेदाध्यवसायादतिशयोक्तिरलङ्कारः । सप्तलोकविजयिनो रावणस्य विजेतृत्वात् तेषु राम एवाद्वितीयो वीर इति शब्दशक्ति-मूलो वस्तुध्वनिः ।

सप्तलोकानाह अग्निपुराणम्—

"भूर्भुवः स्वर्महश्चैव जनश्च तप एव च ।

सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः ।" ॥ २७ ॥

(ब) लव इति । व्यथया उक्तोक्तिश्रवणान्मनोवेदनया सहेति सव्यथम् । अक्षराणि वर्णाः 'अयमश्व' इत्यादिवाक्यमित्यर्थः सन्दीपनानि उत्तेजकानि कोपोत्-साहवर्द्धकानीति यावत् । "प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यये"ति

बटवः। किमुच्यते, प्राज्ञः खलु कुमारः। (अ)

लवः। भो भोः! तत्किमक्षत्रिया पृथ्वी? यदेवमुद्धतमुद्घोष्यते। (ब) (१)

नेपथ्ये। अरे! महाराजं प्रति कुतः क्षत्रियाः। (स)

लवः। धिग् जाल्मान्! (ह)

न्यायेन वीरस्य वीरान्तरवीरत्वघोषणाश्रवणे कोपोत्साहयोरुत्पत्तिर्जना स्वभावसिद्धैवेति भावः। स्वभावोक्तिरियम्।

(अ) बटव इति। किमुच्यते किं वक्तव्यमस्तीत्यर्थः, कुमारः खलु प्राज्ञः सर्वेषामस्माकं मध्ये लव एव विशेषाभिज्ञः, अस्मिन् विषये किं पुनर्वक्तव्यमस्तीति समुदायार्थः। अधीतवेदिकाश्वमेधकाण्डा अपि वयं प्रागिममश्वमवलोकमाना अपि अश्वमेधीयत्वेन न निश्चितवन्तः, किन्तु लवो दर्शनमात्रमेव निश्चितवानिति अस्माकं मध्ये लवस्यैव प्राज्ञतमत्वमव्याहतमेवेति भावः। केचित्तु एभिः सैन्यैः किमुच्यते वयं न बुध्यामहे किन्तु कुमारः प्राज्ञः, तेन स बुध्यत इति भाव इति व्याख्यानमाचक्षते।

(ब) लव इति। यत् यस्मात् एवमीदृशम् उद्धतं सदर्पं उद्घोष्यते रामस्य वीरत्वं प्रख्याप्यते, तत् तस्मात् किं पृथ्वी पृथिवी अक्षत्रिया क्षत्रियरहिता वीरशून्येत्यर्थः मन्यते युष्माभिरिति शेषः। पृथिवीयं क्षत्रियवती सुतरां नेदृशं पुनरुद्घोषणीयमिति भावः।

(स) नेपथ्य इति। अरे इति नीचसम्बोधने। महाराजं रामचन्द्रम्। तथाच रावणविजयिनो रामचन्द्रस्यान्तिके वीर्य्यविषये रावणविजितविदलितक्षत्रियाणामुन्मेष एव निर्बोधतापरिचय इति भावः।

(ह) लव इति। जाल्मान् असमीक्ष्यकारिणः अविवेचकनिति यावत् युष्मान् 'अरे' इत्यादिवादिनः सैनिकानिति शेषः, धिक् निन्दामि। ये वीराणां बलाबलम-

---

(१) यदेवमुद्घोष्येत इति पाठान्तरम्।

यदि ते सन्ति सन्त्वेव, केयमन्या विभीषिका ।
किमुक्तैः, सन्निपत्यैव पताकां वो हराम्यहम् ॥२८॥ (१)

भो भो वटवः परिप्लुत्य लोष्टैरभिघ्नन्तो नयतैनमश्वम् । (२) एष रोहितानां मध्ये वराकश्चरतु । (च)

प्रविश्य सक्रोधदर्पः पुरुषः । धिक् चापलम्, किमुक्तवानसि, तीक्ष्णा-

---

परीक्ष्यैव तारतम्यं निर्दिशन्ति, ते निन्दनीया एवेति भावः । "जाल्मोऽसमीक्ष्यकारी स्यात्" इत्यमरः ।

यदीति । ते रामचन्द्राः रावणादिविजयिन इति भावः । महावीरत्वेन गौरवाद्बहुवचनम् यदि सन्ति तिष्ठन्ति, सन्त्वेव तिष्ठन्तु तावत् । न तेनास्माकं किमप्यायाति याति वेति भावः । किन्तु अन्या का इयं विभीषिका भयप्रदर्शनं, रामस्य महावीरत्वप्रकाशपूर्वकं कथं भयप्रदर्शनं क्रियत इत्यर्थः । न तेन क्षमां करोमीति भावः । अथवा उक्तैः एतद्विषये वागाडम्बरैः किं प्रयोजनमस्ति, अपि तु किमपि नेत्यर्थः, कर्त्तव्यमेव मया करणीयमिति भावः । तथा च सन्निपत्यैव वेगेन गत्वैव न तु किञ्चिद्विवेच्येत्येवशब्दार्थः । अहं वो युष्माकं पतकां जयपताकितां वं जयन्तीं हरामि बलप्रकाशेन गृह्णामि ; यदि भवन्तः शक्नुवन्ति तर्हि रक्षन्त्विति भावः ।

अत्र अर्थापत्तिरलङ्कारः ॥ २८ ॥

(च) भो भो इति । परिप्लुत्य परिवेष्ट्य, लोष्टैः शुष्कमृत्पिण्डैः पाषाणखण्डैर्वा अभिघ्नन्तः ताडयन्तः एनमश्वं नयत आश्रमाभिमुखं चालयत । एष वराकः क्षुद्रोऽश्वः रोहितानां आश्रमस्थमृगविशेषाणां मध्ये चरतु भ्रमतु ।

"रोहितः ।...मृगविशेषः" । "वराकः ।...अधम" इति च शब्दकल्पद्रुमः ।

(क) प्रविश्येति । चापलं चञ्चलतां धिक्, बालस्वभावसुलभचपलतया यदेनमश्वं ताडयन् हर्तुमिच्छसि, तन्निन्दामीत्यर्थः अविवेकप्रयुक्तत्वादिति भावः ।

---

(१) एभिरधुना, तां पताकां हरामि वः ।...शरसम्बाधां पताकां वो हराम्यहमिति पाठान्तरद्वयम् । (२) परावर्तयतैनमश्वमिति विभिन्नः पाठः ।

नीरसा ह्यायुधीयश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते (१), राजपुत्रश्चन्द्रकेतुररिविमर्द्दनः (२) सोऽप्यपूर्वारण्य- (३) दर्शनकौतूहलाक्षिप्तहृदयो न यावदायाति (४) तावत् (५) त्वरितमनेन तरुगहनेनापसर्पत । (क)

बटवः । कुमार ! कृतमनेनाश्वेन, तर्जयन्ति विस्फुरितशस्त्राः

किमुक्तवानसि परित्रातृत्यादि किं कथितवान् त्वं, तादृशं न पुनर्वाच्यमिति भावः । तत्र कारणमाह हि यस्मात् तीक्ष्णाः प्रचण्डाग्रामी नीरसा निर्द्दयाश्चेति तीक्ष्णनीरसाः, आयुधीयश्रेणयः शस्त्रास्त्रधारिणो योद्धृवर्गाः शिशोरपि युवादिषु का कथा बालकस्यापि दृप्तां सगर्वां वाचं न सहन्ते श्रुत्वा न क्षमन्त इत्यर्थः । सुतरां बालकत्वेनापि न ते परित्राणमस्तीति भावः । विशेषतश्च, सोऽपि न केवलमायुधीयश्रेणयः अस्माकं सेनापति-र्न प्रसिद्धः चन्द्रकेतुरपीति अपिशब्दस्यार्थः । अरिविमर्द्दनः शत्रुनिर्यातनकारी, अतएव तेन सह शत्रुताचरणे कस्यापि नास्ति परित्राणमिति भावः । अपूर्वस्य आश्च-र्य्यस्य अरण्यस्य वनस्य दर्शनकौतूहलेन आक्षिप्तम् आकृष्टं हृदयं मनो यस्य स तथोक्तः । अनेन सन्निहितेन तरुगहनेन वृक्षवनेन निविड़वनपथेनेत्यर्थः अपसर्पत पलायध्वम् । गहनशब्देनैव प्रकृतार्थनिर्वाहेऽपि तरुपदोपादानं तस्य निविड़त्वसूचनार्थं तेन च पलायने अन्येषां दर्शनासम्भवेन महती सुविधाऽस्तीति विज्ञापितमिति बोध्यम् ।

(ख) बटव इति । कृतम् अलम् । विस्फुरितानि उद्योतितानि विकसितानि शस्त्राणि यासां ताः, आयुधीयश्रेणयः योद्धृवर्गाः कुमारः त्वां तर्जयन्ति भर्त्सयन्ति । कौतुक-करणार्थं मश्वग्रहणेऽपि यद्यमी क्रुध्यन्ति तदैतदश्वग्रहणेन नास्ति प्रयोजनमिति भावः । नन्वेषु आक्रामत्सु अस्माकं चीत्कारमाकर्ण्य भगवान् वाल्मीकिरागत्य सैनिकान्नि-वारयेदित्याह दूरे चेति । क्लिश्यन्तीति चार्थः । आश्रमपदं तपोवनम् । अतएवास्माकं

---

(१) न इमां वाचमनुसहन्ते । (२) आकृष्टशरासनः । (३) सौम्य पूर्वारण्य… । (४) परापतत्यद्यापि । (५) तत् । इति पञ्च पाठान्तराणि ।

कुमारमायुधीयश्रेणयः, दूरे चाश्रमपदमितस्तदेहि हरिणप्लुतैः पलायामहे। (ख)

लवः। स्मितं कृत्वा। किं नाम विस्फुरन्ति शस्त्राणि।

धनुरारोपयन्। (ग)

ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र-
मुद्गारि घोरघनघर्घरघोषमेतत्।

चोत्कारश्रवणेन भटेरागमनासम्भवात् सैनिकानां निवारणसम्भावनाऽपि नास्तीति भावः। तस्मात् एहि त्वमागच्छ, हरिणप्लुतैः हरिणवत् उल्लम्फनप्रलम्फनैः। अलस-भीरुस्वभावानां ब्राह्मणकुमाराणामनुरूपैवेयमुक्तिरित्यतीवमनोहरेयं कविकल्पना।

(ग) लव इति। क्रोधे नामशब्दः। विस्फुरन्ति उत्तोलनेन विकसन्ति। तदा अहमप्यं तत्प्रतिविधानं करोमीति भावः। आरोपयन् गुणं योजयन् सज्यं कुर्वन्नित्यर्थः।

ज्येति। ज्या मौर्वी गुण इति यावत् जिह्वा रसनेव तया वलयिते वलयाकारं प्रापिते नम्रीकृते इत्यर्थः उत्कटे शत्रूणां भयङ्करे कोटी अग्रभागद्वयं दंष्ट्रे विशाली दन्ताविव यस्य तत्तथोक्तम्, भक्षणलोलुपः कृतान्तो यथा दीर्घया रसनया सृक्कणीद्वयं प्रान्तवर्त्ति विशालदन्तद्वयञ्च मुहुरजस्रञ्च परिलेढि, तथा अयं चापोऽपि लम्बमानेन गुणेन अजस्रवाणवर्षणात् अविरतमग्रदेशद्वयं स्पृशतु इति तात्पर्य्यार्थः। तथा उद्गारी उत्क्षिपन्, घोरो भयङ्करः, घनो निरन्तरः, घनस्य मेघस्येव वा, घर्घरघोषो घर्घरेत्येवं गम्भीरटङ्कारध्वनिर्यस्मात् तत् तथोक्तम्, एतत् मदीयं चापं धनुः कर्त्तृ, कृतान्तो यथा मड़मड़ेत्येवं चर्वणशब्दं करोति, तथा अयमपि चापः घर्घरटङ्कारध्वनिं करोत्विति तात्पर्य्यार्थः; ग्रासे प्रलयकालीनजगत्कवलीकरणे प्रसक्तस्य प्रवृत्तस्य, हसतो विकटहास्यं कुर्वतः, अन्तकस्य कालस्य यत् वक्त्रं मुखं यन्त्रमिव तस्य जृम्भां व्यादानं विडम्बयितुम् अनुकर्त्तुं शीलं यस्य तत् ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्रजृम्भाविडम्बि, तादृशं विकटं दारुणम् उदरं मध्यं यस्य तत् तथोक्तम् अस्तु भवतु। प्रलयकाले कृतान्तो यथा

ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र-
जृम्भाविडम्बि विकटोदरमस्तु चापम् ॥२८॥

इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे । (ध)

प्रचुरभक्ष्यलाभादानन्देन विकटहास्यकरणात् मुखव्यादानं करोति, तथा अयमपि चापः प्रचुरविनाशनीयलाभेन गुणारोपणात् विपुलायतनमुदरं करोत्विति तात्पर्य्यम् ।

अत्र रेखाङ्कितस्थलवर्त्तिनीनां पञ्चानां लुप्तोपमानाम् अङ्गाङ्गिभावेन सङ्करः । तेन च चापेनैव सर्व्वमेव सैन्यसमूहमहं व्यापादयिष्यामीति वस्तु व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः, तथा कदापि न खलु कालो लोलरसनामुखव्यादानादिकं विधाय जगद्-ग्रासं करोति, तथापि तत्सम्बन्धोक्तिः "उभौ यदि व्योम्नि पृथक् प्रवाहावाकाश-गङ्गापयसः पतेता"मित्यादिवदसम्बन्धे सम्बन्धरूपातिशयोक्तिरलङ्कारश्च व्यज्यत इत्यलङ्कारे-णालङ्कारध्वनिरपि । तथा प्रथमे पादे कटकोटीत्यंशयोरनेकधा सकृत्साम्यात् छेकानुप्रासः, द्वितीये एकस्य जकारस्य असकृत्साम्यात् वृत्त्यनुप्रासः; तृतीये सकारस्य असकृत् साम्यात् वृत्त्यनुप्रासः, तथा चतुर्थे विशब्दस्य सकृत् साम्यात् वृत्त्यनुप्रासश्च इत्थं तेषां संसृष्टिः । तथाऽत्र दुःश्रवत्वदोषः सन्नपि गुणायते, वक्तुः क्रुद्धत्वात् वीररसाश्रयत्वाच्च । तथा चोक्तं साहित्यदर्पणे ।

"वक्तरि क्रोधसंयुक्ते वाच्येऽत्यन्तं समुद्धते ।
रौद्रादौ तु रसेऽत्यन्तं दुःश्रवत्वं गुणो भवेत् ॥"

तथाऽत्र युद्धवीरो रसः, ओजो गुणः, गौड़ी रीतिः ।

चापशब्दस्य "धनुश्चापौ"इत्यमरकोषे पुंसा निर्द्देशेऽपि साहचर्य्यात् क्लीवत्वमपि ज्ञेयम् । वलयितेति करोत्यर्थे णिजन्तात् कर्म्मणि क्तः ।

वसन्ततिलका वृत्तम् ॥२८॥

(ध) इतीति । यथोचितम् उचितमनतिक्रम्य । एकेन द्वारेण लवादिमुनि-कुमाराः, अन्येन च द्वारेण सैनिका निष्क्रान्ता इत्यर्थः प्रकृतवैरयोः विभिन्नपथेनैव गमनौचित्यात् ।

इति कौशल्याजनकयोगो नाम चतुर्थोऽङ्कः।(ङ)

———:०:———

(ङ) इतीति। इतिशब्दोऽङ्कसमाप्ती। कौशल्याजनकयोर्योगः मिलनं साक्षात्कार इति यावत् यत्र सः। नाम कौशल्याजनकयोग इति नाम्ना प्रसिद्धः, चतुर्थोऽङ्कः समाप्त इति शेषः।

इति श्रीहरिदाससिद्धान्तवागीश-विरचितायामुत्तररामचरित-
टीकायां सर्वार्थबोधिनी-समाख्यायां चतुर्थाङ्क-
विवरणं समाप्तम्॥०॥

अथ पञ्चमोऽङ्कः ।

नेपथ्ये ।

भो भोः ! सैनिकाः ! जातं जातमवलम्बनमस्माकम् । [क]

नन्वेष त्वरितसुमन्त्रनुद्यमान-
व्यावल्गत्प्रजवनवाजिना रथेन ।
उद्घातप्रचलितकोविदारकेतुः [१]
श्रुत्वा नः [२] प्रधनमुपैति चन्द्रकेतुः ॥१॥

(क) भो भोइति । अस्माकम् अनेन मुनिकुमारेण निहन्यमानानामिति भावः अवलम्बनं, रक्षकत्वेनाश्रयः आश्वासकारणमित्यर्थः, जातं भूतम् । हर्षे द्विरुक्तिः ।

कथमित्याह नन्वेष इति । नन्विति सैनिकसम्बोधने । एषः अनतिदूरे दृश्यमानः चन्द्रकेतुः अस्माकं सेनापतिः लक्ष्मणपुत्रः चन्द्रकेतुनामा वीरः नोऽस्माकं प्रधनं केनचिन्मुनिकुमारेण सह युद्धं श्रुत्वा संवाददातुर्मुखादाकर्ण्य त्वरितेन त्वरान्वितेन सुमन्त्रेण सुमन्त्रनामकेन सारथिवरेण नुद्यमानाः प्रेर्यमाणाः व्यावल्गन्तः प्रधावन्तः अतएव प्रजवना महावेगा वाजिनो घोटका यस्य तेन तथोक्तेन रथेन करणेन उद्घातेन उन्नता-

---

(१) उद्घातप्रचलितकोविदारकेतु इति विसर्गहीनं क्रियाविशेषणरूपं पाठान्तरम् ।

(२) वः । इति पाठभेदः ।

ततः प्रविशति सुमन्त्रसारथिना रथेन धनुष्पाणिः

साद्भुतहर्षसम्भ्रमश्चन्द्रकेतुः । [ख]

चन्द्र । आर्य्य ! सुमन्त्र ! पश्य पश्य । [ग]

किरति कलितकिञ्चित्कोपरज्यन्मुखश्री-

रनवरतनिगुञ्जत्कोटिना कार्म्मुकेण ।

समतभूमिः यः मुहुः प्रतिघातेन प्रचलितः कम्पितः कोविदारकेतुः रक्तकाञ्चनरचनिर्म्मित-ध्वजदण्डो यस्य स तथोक्तः सन् उपैति समरभूमिमागच्छति, अश्वान् परिरक्षन् युद्धार्थ-मिति शेषः । अतएव न श्रमाश्वसितीति भावः ।

अत्र प्रजवनत्वं प्रति व्यावल्गनं हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः, तथा द्वितीयार्द्धे केतुः केतुरिति अन्त्ययमकञ्च शब्दालङ्कारः, अनयोः संसृष्टिः ।

"कोविदारः । रक्तकाञ्चनश्च" इति शब्दकल्पद्रुमः । 'युद्धमायोधनं जन्यं प्रधनं प्रविदारणम्' इत्यमरः ।

त्वरा अस्य सञ्जातेति तारकादित्वादितच् प्रत्ययः ।

प्रहर्षिणी वृत्तम् ।

भो भोइत्यादिः योकस्थचन्द्रकेतुरित्यन्तः सन्दर्भः चूलिका नाम विष्कम्भकादिव दर्थोपक्षेपकः । तथा च साहित्यदर्पणः—

"अन्तर्जवनिकासंस्थैः सूचनाऽर्थस्य चूलिका ।" ॥१॥

(ख) तत इति । अद्य त्वदुर्द्धर्षसैनिकैः सह एकाकिनोबालकस्य समरदर्शनात् अद्भुतम् आश्चर्य्यम्, वीराणां समानवीरान्तरलाभस्य आनन्दकारणत्वात् हर्षः आनन्दः, स्वकीयस्य अविनाशदर्शनात् सम्भ्रमः त्वरा तैः सह विद्यमान इति साद्भुतहर्षसम्भ्रमः ।

(ग) चन्द्रेति । स्वपितामहदशरथस्य मन्त्रित्वेन ततुक्तपरत्वात् आर्य्येति गौरवसम्बोधनम् । पश्य पश्येति विस्मये द्विरुक्तिः ।

किरतीति । कलितेन कृतेन "कलिः कामधेनु" रिति मल्लिनाथः किञ्चित्कोपेन बहुसंख्यकानामपि अस्मनसैनिकानामनितुच्छतयाऽवज्ञानात् अथच आक्रमणात् ईषत्-क्रोधेन रज्यन्ती लोहितायमाना मुखश्रीर्वदनकान्तिर्यस्य स कलितकिञ्चित कोप-

समरशिरसि चञ्चत्पञ्चचूडश्चमूना-
मुपरि शरतुषारं कोऽप्ययं वीरपोतः ॥२॥

आश्चर्य्यम्। [घ]

मुनिजनशिशुरेकः सर्वतः सैन्यकाये
नव इव रघुवंशस्याप्रसिद्धः प्ररोहः।

रक्ताम्बुजश्रीः, तथा चञ्चन्त्यः सर्वासु दिक्षु अविरतपरिभ्रमणात् मस्तककम्पनेन कम्पमानाः पञ्चचूडाः शिखा यस्य स चञ्चत्पञ्चचूडः मस्तककम्पनात् चलितकाकपक्ष इत्यर्थः अयं दृश्यमानः कोऽपि अपरिचितः वीरस्यासौ पोतः शिशुरिति वीरपोतः शूरबालकः समरशिरसि युद्धमूर्द्धनि संग्रामभूमावित्यर्थः अनवरतं अजस्रं निघ्नन्त्यौ टङ्कारं कुर्वन्त्यौ कोटी अटन्यौ अग्रदेशाविति यावत्, यस्य, तेन तथोक्तेन कार्म्मुकेण धनुषा अमूनामस्मात् सेनानाम् उपरि शरा बाणास्तुषारः असंख्यत्वात् हिममिव तं किरति विक्षिपति। एतदेवाश्चर्य्यमिति भावः।

अत्र शरतुषार इति लुप्तोपमाऽलङ्कारः, तथा प्रथमार्द्धे ककारस्य तृतीयपादे चकारस्य चतुर्थपादे च रेफस्यासकृत् पाठात् वृत्त्यनुप्रासः, किञ्च तृतीयपादे चञ्चत्पञ्चेति छेकानुप्रासः, तेन च तृतीयपादे वृत्त्यनुप्रासच्छेकानुप्रासयोरेकाश्रयानुप्रवेशरूपः सङ्करः। इन्द्रधनुःपरिशोभितः शब्दायमानो नवजलधरो यथा वारि वर्षति, तद्वदयं बाणान् वर्षतीति व्यज्यते, तेन च वस्तुनाऽलङ्कारध्वनिः। शराणामसंख्यत्वांश एव तुषारसादृश्यं तेन न उपमानस्य प्रमाणगतन्यूनत्वरूपानुचितार्थत्वदोषः।

मालिनी वृत्तम् ॥२॥

(घ) आश्चर्यं परश्लोके व्यक्तीभविष्यति।

मुनीति। नवो नूतनः अतएव अप्रसिद्धः लोके अप्रथितः रघुकुलस्य रघुवंशस्य प्ररोहः अङ्कुर इव एकः द्वितीयरहितः निःसहाय इति यावत् मुनिजनशिशुः ऋषिबालकः सर्वतः सर्वस्मिन् सैन्यकाये सैनिकसमूहे। ज्वलितक्रियाया अधिकरणे सप्तमीयम् दलिता विमर्द्दिता ये करिकपोलग्रन्थयः हस्तिगण्डस्थलिभागाः तेषु टङ्कारेण टंटमितिध्वनिरूपेण

दलितकरिकपोलग्रन्थिटङ्कारघोरं [१]
ज्वलितशरसहस्रः कौतुकं मे करोति ॥१॥ [२]

आश्चर्यमाश्चर्यम्। [ङ]

सुमन्त्रः। आयुष्मन्! [च]
अतिशयितसुरासुरप्रभावं
शिशुमवलोक्य तवैव तुल्यरूपम्। [३]

विदारणशब्देन घोरं भयङ्करं यथा स्यात्तथा ज्वलितानि दीप्तानि शरसहस्राणि बाणसमूहा यस्य स तथोक्तः सन् मे मम कौतुकं कौतूहलं करोति विदधाति। असौ मुनिबालकः सुधारशरसमूहेन हस्तिकपोलास्थीनि सशब्दं विदारयन् निखिलसैनिकपुरुषांश्च निपीडयन् यत् स्वयमकुतोभयः सुस्थ एवास्ते तदेवाश्चर्यमिति भावः।

अत्रोपमाऽलङ्कारः, इवशब्दसत्त्वेन प्ररोहत्वारोपाभावान्न रूपकमिति भाव्यम्।

"काथः।···संघः"। "प्ररोहः। अङ्कुर"इति च शब्दकल्पद्रुमः।

मालिनी वृत्तम् ॥१॥

(ङ) आश्चर्यम् एकेन शिशुना दुर्धर्षबहुसैन्यनिपीडनमित्यर्थः। अतिशये द्विरुक्तिः।

(च) सुमन्त्र इति। आयुष्मन्निति रथिनः सम्बोधनं सारथिः कार्यव्यतया नियमितम्। तथा च साहित्यदर्पणम्।

"आयुष्मन् रथिनं सूतः"। वदेदिति पूर्वेणान्वयः।

अतीति। अतिशयितः अतिक्रान्तः सुरासुराणां देवदैत्यानां प्रभावो माहात्म्यं विक्रम इति यावत् येन तम् अतिशयितसुरासुरप्रभावम्। ननु तर्हि किं मत्तोऽप्यसौ प्रधानवीर इत्याह तवैव तुल्यरूपं समानस्वरूपं समानवीरमिति यावत् अमुं शिशुं

---

(१) टङ्कारघोरेति अनुस्वारहीनं पाठान्तरम्। (२) कस्मिंश्चित् पुस्तके मुनिजनेत्यादिश्लोकात् परं किरतीत्यादिश्लोकसन्निवेशो दृश्यते। प्राथमिकमाश्चर्यमिति च नास्ति। (३) बतैव तुल्यरूपमिति पाठभेदः।

कुशिकसुतमखद्विषां प्रमाथे
धृतधनुषं रघुनन्दनं स्मरामि ॥४॥

चन्द्र। इममन्वेकमुद्दिश्य [१] भूयसामारम्भ इति हृदयमपत्रपते। [क]

अयं हि शिशुरेककः समरभारभूरिस्फुरत् [२]
करालकरकन्दलीकलितशस्त्रजालैर्बलैः।

इति बालकमवलोक्य कुशिकसुतस्य विश्वामित्रस्य मखद्विषां यज्ञविघ्नकारिणां सुबाहुमारीचादिराक्षसानामित्यर्थः प्रमाथे विमर्द्दने धृतधनुषं धनुर्द्धरं रघुनन्दनं रामं स्मरामि। पराक्रमेण आकारेण च सर्वथैव शिशुरसौ रामसमानः तव च समान इति भावः।

अत्र सुरासुरप्रभावातिक्रमासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः, तथैव तुल्यरूपमिति चार्थी उपमा, तथा सादृश्येन रामचन्द्रस्मरणात् स्मरणनामाऽलङ्कारश्च, एतेषामङ्गाङ्गिभावेन सङ्करः।

विश्वामित्रेण स्वकीयतपोवनं नीतो रामभद्रः तदीययज्ञविघ्नकारिणः सुबाहुमारीचादीन् शरजालैरमर्द्दयदिति रामायणवार्त्ता।

पुष्पिताया वृत्तम् ॥४॥

(क) चन्द्रेति। तु किन्तु, एकं द्वितीयसहायरहितं इमं बालकमुद्दिश्य प्रतिपक्षत्वेन स्वीकृत्य भूयसां प्रभूतानामस्मत्सैन्यानामित्यर्थः; आरम्भः युद्धोपक्रमो वर्त्तत इति शेषः। इति हेतोः, हृदयं मदीयं मनः अपत्रपते लज्जते। अस्माकं प्रत्यक्षस्य दुर्बलताप्रकाशादिति भावः। एतेन चन्द्रकेतोर्महत् वीर्यं औदार्य्यञ्च व्यज्यते।

अयमिति। समरभारे संग्रामरूपदुर्वहव्यापारे तुमुलयुद्धकार्य्ये इत्यर्थः; भूरि प्रचुरं सातिशयमित्यर्थः यथा स्यात्तथा स्फुरन्ति दीप्यमानानि करालानि भयानकानि

---

(१) मम त्वेकमुद्दिश्येति पाठान्तरम्।

(२) समररेणुभूरिस्फुरदिति पाठभेदः।

क्वणत्कनककिङ्किणीझणझणायितस्यन्दनै-
रमन्दमददुर्द्दिनद्विरदवारिदैरावृतः ॥५॥

सुम। वत्स ! एभिः समस्तैरपि किमस्य, किं पुनर्व्यस्तैः। (ञ

करकन्दलीभिः लम्बमानविशालहस्तैः कलितानि गृहीतानि शस्त्रजालानि आयुधवृन्दानि येषां तैः तथोक्तैः, तथा क्वणन्त्यः शब्दायमाना याः कनककिङ्किण्यः स्वर्णनिर्म्मितक्षुद्र-घण्टाः ताभिः झणझणायिताः झण झण इत्येवं शब्दं कुर्वन्तः स्यन्दना रथा येषां तैः तथोक्तैः, तथा अमन्दा अनल्पाः प्रचुरा इति यावत् मदा दानजलानि दुर्द्दिनानि वृष्टय इव येषां ते अमन्दमददुर्द्दिना द्विरदा हस्तिनः वारिदा मेघा इव येषु तैः तथोक्तैः सैन्यैः अस्मत्सैनिकैः अयम् एककोऽपि एकाकी एव नान्यपरसहायशालीत्यर्थः शिशुर्बालक आवृतः हन्तुं परिवेष्टितः। पदातिरथिहस्त्यारोहिभिर्मम सैन्यैः हन्तुमयमेको बालकः समावृत इत्येतन्महदनुचितमिति भावः।।

अत्र करकन्दलीत्यत्र लुप्तोपमा, तथा चतुर्थपादे लवस्य परिवेष्टनरूपावरणक्रिया उपमायाः साधिका रूपकस्य च बाधिकेति लुप्तोपमैव, अनयोः संसृष्टिः, वृत्त्यनुप्रासश्च तत्स्थान् प्रति करुणाकरणाय अलङ्कारनिपुणा मनस्विनः कारणममीषामनुसन्दधीरन्, इतरथा प्रतिपदमलङ्कारनिवेशनेन नितान्तमुपचीयमानकलेवरा किल टीकेयं नवीनानां विशालविरागमावहेदिति समुपेक्षितम्।

“हि हेताववधारणे।” “किङ्किणी क्षुद्रघण्टिका” “मूढाल्पापटुनिर्भाग्या मन्दाः स्युः।” इति चामरः। “कन्दली। स्तम्बः।” “घनान्धकारे वृष्टौ च दुर्द्दिनं कवयो-विदु”रिति सारः” इति च शब्दकल्पद्रुमः। एतेन “दुर्द्दिनं लक्षणया वर्षण”मिति यत् केनचिदुक्तं तत् परिहार्य्यम्।

झणझणेत्यव्यक्तानुकरणशब्दात् “अव्यक्तानुकरणा”दित्यादिना डाच्, “डाज्लोहितादिभ्यश्च” इत्यादिः, ततः कर्त्तरि क्तः।

पृथ्वी वृत्तम् “जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरु”रिति लक्षणात् ॥५॥

(ञ) सुमेति। एभिरस्मत्सैनिकैः समस्तैरपि मिलितैरपि एकयापि

चन्द्र । आर्य ! त्वर्य्यतामनेन हि महानाश्रितजनप्रमाथोऽभ्यावमारब्धः । तथाहि । (झ)

आगुञ्जद्गिरिकुञ्जकुञ्जरघटाविस्तीर्णकर्णज्वरं
ज्यानिर्घोषममन्ददुन्दुभिरवैराध्मातमुज्जृम्भयन् ।

सकलैर्युध्यमानैरपि सह्निरित्यर्थः, अस्य बालकस्य किं क्रियतामिति शेषः पुनः किन्तु व्यस्तैः एकैकशो युद्धप्रहर्त्तैः किं क्रियतामिति शेषः । महाधीरोऽयं बालक इति भावः ।

अत्र 'एभिः समस्तैरपि किमस्य' इत्यनेनैव वक्तव्यार्थनिर्वाहेऽपि पुनः किं पुनर्व्यस्तैरित्युक्ता 'सहसा विदधीत न क्रिया'मित्यादिवदयं गतपुनरुक्तत्वदोषः, किं पुनर्व्यस्तैरित्यंशे तत्परिहारेण तत्समाधानं विधेयम् ।

(झ) चन्द्रेति । त्वर्य्यतां सत्वरेण भूयतां त्वयेति शेषः, शीघ्रं रथः प्रेष्यतामित्यर्थः । हि यस्मात्, आश्रितजनानां अस्मद्पक्षीविसैन्यानां प्रमाथो विमर्द्दनं विनाश इति यावत् । तथाहि तमेवार्थं जानीहीत्यर्थः ।

आगुञ्जदिति । वीरः एष शूरो बालकः, आगुञ्जन्तः तवस्य ज्याघोषश्रवणेन भयवशात् गम्भीरध्वनिं कुर्वन्तः ये गिरिकुञ्जकुञ्जराः पार्वत्यलतादिसमाच्छादितस्थानवर्त्तिनो हस्तिनः तेषां या घटा समूहस्तस्या विस्तीर्णः बाहुल्येनोत्पादितः कर्णज्वरः नितान्तदीर्घकर्कशतया श्रुतिपीड़ा येन तं तथोक्तं, यस्य दूरगामिनो ज्याघोषस्य श्रवणात् भीता वन्यहस्तिनो व्याकुलतया गर्जन्ति कर्णपीड़ाञ्चानुभवन्ति तमित्यर्थः; तथा अमन्दा अनल्पा बहुला इत्यर्थः ये दुन्दुभिरवाः अस्मत्पक्षीयवाद्यविशेषध्वनयस्तैः आध्मातं परिवर्द्धितं ज्याघोषम् अविरतवाणवर्षणेन मुहुर्मुहुः सञ्चालनात् मौर्व्वीशब्दम् उज्जृम्भयन् उत्पादयन् सन् वेल्लतां भूमौ स्पन्दमानानां भैरवानां भयानकानां रुण्डानां कवन्धानां मस्तकरहितशरीराणां मुण्डनिकरैः मस्तकसमूहैः करणैः भुवः समरभूभागान् तन्वतः, प्रभूतमांसलाभेन सन्तुष्यतः कालस्य यमस्य यत् करालं भयङ्करं वक्त्रं मुखं तस्य विघसैः भुक्तावशिष्टैः व्याकीर्य्यमाणाः समाच्छाद्यमाना इव विधत्तं करोति अनदयासि प्रहतस्य प्रभूत-

वेल्लद्भैरवरुण्डमुण्डनिकरैर्वीरो विधत्ते भुवः (१)
तृप्यत्कालकरालवक्त्रविघसव्याकीर्य्यमाणा इव ॥६॥

सुम । स्वगतम् । कथमीदृशेन सह वत्सस्य चन्द्रकेतोर्द्वन्द्वसम्प्रहारमनुजानीयाम् । (२) विचिन्त्य । अथवा इक्ष्वाकुकुटुम्बवृद्धाः खलु वयं प्रत्युपस्थिते [३] च का गतिः । [ञ]

भोजनेन सन्तुष्टस्य यमस्य व्यात्ताननाद्विगलितैः भक्तसंन्यमस्तकैः समरभूमिरियं प्रायेण समाच्छन्नेति निष्कर्षः । सुतरां सत्वरं गत्वा द्वन्द्वयुद्धे न तन्निवारणं मया करणीयमिति भावः ।

अत्र पार्वत्यगजानां तादृशकण्ठ्यरोत्पत्तिरसम्भवेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः, तया भावाभिमानिनी वाच्या क्रियोत्प्रेक्षा चालङ्कारः, तयोश्च मिथोऽनपेक्षत्वात् संसृष्टिः तया प्रथमचतुर्थचरणयोर्वृत्त्यनुप्रासः, एवं कीर्णकर्ण, मन्ददुन्दु, रुण्डमुण्डेति व्यञ्जनानामनेकधासकृत्साम्यात् छेकानुप्रासश्च ; अनयोरपि संसृष्टिः ।गुञ्जनस्य भ्रमरादेः 'गुन् गुन्' शब्द एव ख्यातत्वादत्र तु हस्तिध्वनौ तत्प्रयोगात् ख्यातिविरुद्धतादोषः, स च 'उद्गर्ज्जद्गिरिकुञ्ज'त्यादि पाठेन समाधेयः ।

"गजानां घटना घटा"। 'विघसो यज्ञशेषभोजनशेषयो'रिति चामरः । 'कबन्धः कथ्यते रुण्ड'इति हलायुधः ।

विपूर्व अदेः उपसर्गेऽदेरन् 'घञपोश्च'इति घसादेशः ।

शार्दूलविक्रीडितं वृत्तम् ॥६॥

(ञ) सुमेति । ईदृशेन अद्भुतकर्म्मणा महावीरेण लवेन सहेत्यर्थः । वत्सस्य पुत्रस्य सम्प्रहारं युद्धं एकाकिनश्चन्द्रकेतोर्युद्धमिति निष्कर्षः, अनुजानीयां अनुमतिं दद्यां । अत्र व्यस्तं न्यस्तं हारकारिणा अनेन सममेकाकिनश्चन्द्रकेतोर्युद्धे यदि अनिष्टपातः

---

(१) भुवमिति पाठान्तरम् । (२) अनुजानीम इति पाठभेदः । (३) रणे इत्यधिकः पाठः क्वचित् ।

चन्द्र । सविस्मयलज्जासम्भ्रमम् । धिक् प्रतिनिहतानि सर्वतः सैन्यानि मम । [ट]

सुम । रथवेगमभिनीय । आयुष्मन् ! एष वाग्विषयीभूतस्ते स वीरः । [ठ]

चन्द्र । विकृतिमभिनीय । आर्य्य ! किमस्य नामधेय [१] माख्यातमाख्यायकैः ? । [ड]

त्वादिति भावः । लिखितस्य विवरणम् । इक्ष्वाकुकुले इक्ष्वाकुवंशोत्पन्ने दशरथगृहे महत्तमत्वं सारथ्ये च यौवने नियुक्ताः सन्तः इदानीं वार्द्धक्यमुपगताः, सुतरामितेषां युद्धमनिवर्त्तित्वम्माचारमवगच्छन्तोऽपि कथं निवारयाम इति भावः । विशेषतस्ते ति चकारार्थः, प्रत्युपस्थिते आपतिते समरे इति शेषः, का गतिः क उपायः समरनिवृत्त्यर्थः । इदानीमनयोरनिवार्य्य एव जातः समरः, तन्मया अनुमतिरेव दातव्येति भावः ।

यद्यमिति 'वाऽव्ययदर्थ'"ति बहुवचनम् ।

(ट) चन्द्रेति । लवस्य महाविक्रमदर्शनात् विस्मयः, स्वकीयसैन्यानां पराजयावलोकनात् लज्जा, तेषां रक्षणाय सम्भ्रमस्त्वरा, तैः सहेति तथोक्तम् । सर्वतः सर्वासु दिक्षु, सैन्यानि बलानि प्रतिनिहतानि पराजयेन पराङ्मुखानि, धिक् निन्दार्थीयम्; सैन्यमुखस्य यामी चक्रिणां पृष्ठप्रदर्शनस्य नितान्तनिन्दनीयत्वादिति भावः ।

'वरूथिनी बलं सैन्य"मित्यमरः ।

(ठ) सुमेति । रथवेगमभिनीय रथं वेगेन चालयित्वेत्यर्थः । एष दृश्यमानः, सः अश्वतसैन्यप्रमाथी वीरः ते तव वाग्विषयीभूतः रथचालनेन सान्निध्यादालापगोचरीभूतः । पूर्वं दूरवर्त्तित्वात वाक्यं श्रावयितुमशक्य आसीत् इदानीन्तु सन्निहित इति यथेष्टमालपितुमर्हसीति भावः ।

(ड) चन्द्रेति । विकृतिं विस्मयसूचकमूर्द्धदृष्टिपातादिकम् । आख्यायकैः

---

(१) किं सन्नामधेयमिति पाठान्तरम् ।

सुम। वत्स! लव इति। [ढ]

चन्द्र। भो भो लव! महाबाहो! किमेभिस्तव सैनिकैः।
एषोऽहमेहि मामेव तेजस्तेजसि शाम्यतु ॥७॥

सुम। कुमार! पश्य पश्य। [ण]

व्यपवर्त्तत एष बालवीरः पृतनानिर्म्मथनात्त्वयोपहूतः।
स्तनयित्नुरवादिभावलीनामवमर्द्दादिव दृप्तसिंहशावः ॥८॥

युद्धवार्त्ताहरैः, अस्य महावीरशिशोः, किं नामधेयं नाम आख्यातं कथितं, आरक्षि-षेत्, तद्‌ब्रूहि, अन्यथा आलापे बलवदसुविधा स्यादिति भावः।

(ढ) सुमेति। लव इति लव इत्यानुपूर्वीकमस्य नामधेयमित्यर्थः।

भो भो इति। महान्तौ वीर्य्यवत्तया विशालौ बाहू यस्य तत्सम्बोधनं, भो भो लव! सम्भ्रमे द्विरुक्तिः। एभिरस्मदीयैः सैनिकैः सैन्यैः तव किं प्रयोजनमित्यर्थः; तव असमानतया एभिः सह युद्धं न करणीयमिति भावः। एषः अहमस्मि तव युद्धयोग्य इति भावः, अतएव मामेव एहि योद्धुमागच्छ। ननु तेनापि किं भविष्यतीत्याह-तेजः त्वदीयः पराक्रमः क्षुद्रवह्निश्च तेजसि मदीये पराक्रमे वह्निपुञ्जे च शाम्यतु लयं गच्छतु। एतान् सामान्यसैनिकानवमर्द्दयन्नपि न खलु ममान्तिके पराक्रमितुमर्हसीति भावः।

अत्र वह्निपराक्रमयोर्भेदेऽपि श्लेषाभेदाध्यवसायमूला अतिशयोक्तिरलङ्कारः।

'तेजस्।...पराक्रमः, अग्नि"रिति शब्दकल्पद्रुमः।

(ण) सुमेति। पश्य पश्येति विस्मये द्विरुक्तिः।

व्यपेति। एष दृश्यमानः बालश्चासौ वीरश्चेति बालवीरः शिशुशूरः त्वया उपहूतः युद्धकरणाय आहूतः सन् दृप्तः बलदर्पान्वितः सिंहशावः केशरिशावकः स्तनयित्नोर्मेघस्य रवात् गर्जितं श्रुत्वेत्यर्थः इभावलीनां गजश्रेणीनां अवमर्द्दात् मर्द्दनात् विनाशादिव पृतनायाः अस्मत्सेनायाः निर्म्मथनात् विदलनात् व्यपवर्त्तते निवर्त्तते; केशरिशावको यथा मेघनिनादमाकर्ण्य गर्जभ्रमात् बलवन्तमपरं जन्तुं मन्यमानो गजयूथविमर्द्दं नारभमाणो मेघाभिमुखं धावति, तथाऽयमपि बालकः स्वयं त्वया समाहूतः सन्

ततः प्रविशति त्वरितोद्धतक्रमो लवः । (त)

लवः । साधु, राजपुत्र ! साधु, सत्यमैक्ष्वाकः खल्वसि, तदयं परागत एवास्मि । [थ]

नेपथ्ये महान् कलकलः । (द)

लवः । सावेगम् परावृत्य । कथमिदानीं भग्ना अपि प्रतिनिवृत्त्य युद्धाभिसारिणः पर्य्यवष्टभ्य निघ्नन्ति मां चमूपतयः, धिग्जाल्मान् । [ध]

सेनाविनाशमपहाय तवाभिमुखमागच्छतीति निष्कर्षः । अनेन तस्य कर्मणा विस्मितोऽस्मीति भावः ।

अत्र उपमाऽलङ्कारः ।

सैन्यविमर्दादिति 'ल्यपोऽधिकरणकर्म्मणोरप्रयोगिणि" इति पञ्चमी, ल्यप्लोपे पञ्चमीत्यपरे ।

मालभारिणीवृत्तम् 'विषमे ससजा यदा गुरू चेत् सभरा येन तु मालभारिणीय"मिति लक्षणात् । अस्यैव औपच्छन्दसिकमिति नामान्तरम् ॥८॥

(त) तत इति । त्वरितो द्रुतः, उद्धतः सगर्व्वश्च, क्रमः पादक्षेपो यस्य सः ।

(थ) लव इति । साधु भद्रं, व्यवहरसीत्यध्याहृत्य क्रियाविशेषणम् । हर्षे साधुशब्दस्य द्विरुक्तिः, वीरस्य वीरान्तरलाभे हर्षः स्वाभाविक एवेति बोध्यम् । खलु निश्चये, सत्यं खलु यथार्थमेव, ऐक्ष्वाक इक्ष्वाकुवंशोत्पन्नः असि, इक्ष्वाकुवंशोद्भवानां पीडितपरित्राणस्य पराक्रमप्रकाशस्य च चिरप्रथितत्वादिति भावः । तत्तस्मात् त्वादृशवीरलाभात् अयं अस्मि अयमहं, परागत एव त्वत्समीपे उपस्थित एव । अयोगव्यवच्छेदे एवशब्दः । सुतरां यथेष्टं व्यवहर्त्तुं सहं सौति भावः ।

(द) नेपथ्ये इति । कलकलः सैन्यानां कोलाहलः ।

(ध) लव इति । आवेगेन उत्सा...जनया सहेति सावेगं, परावृत्य पुनः सैन्यानामभिमुखीभूय । भग्ना अपि मया पराजिताः सन्तः पृष्ठप्रदर्शिनोऽपि प्रतिनिवृत्त्य

अयं शैलाघातक्षुभितवडवावक्त्रहुतभुक्
प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु मे ।
समन्तादुत्सर्पन् घनतुमुलसेनाकलकलः
पयोराशेरोघः प्रलयपवनास्फालित इव ॥८॥

मत्काभिमुखीभूय युद्धमभिसर्तुं शीलं येषां ते युद्धाभिसारिणः पुनरपि युद्धोद्यताः सन्तः पर्यवष्टभ्य परितो दर्पेणावस्थाय चमूपतयः सेनापतयः मां इदानीं निघ्नन्ति प्रहरन्ति ; अत एव आत्मान् अपसदान् नीचानिति यावत् धिक् निन्दामि, एतान् चमूपतीनिति शेषः । पराजयात् परमपि पुनर्युद्धानुसरणे निर्लज्जताप्रकाशेन नीचत्वस्यावधारणादिति भावः ।

'निहीनोऽपसदो जाल्म' इत्यमरः ।

अयमिति । समन्तात् सकलासु दिक्षु, उत्सर्पन् उत्तिष्ठन्, अयं श्रूयमाणः घनो निरन्तरः, तुमुलः सङ्कुलः विश्रृङ्खलभावेनोत्पन्न इत्यर्थः सेनाकलकलः सैन्यकोलाहलः, प्रलयपवनेन युगान्तकालीनवायुना आस्फालित आलोडितः पयोराशेः समुद्रस्य ओघो जलसमूह इव मे मम शैलानां समुद्रान्तर्निमग्नपर्वतानां आघातेन सङ्घर्षेण क्षुभितः उद्वेलितः यः वडवावक्त्रहुतभुक् तुरङ्गकान्तामुखहव्यवाहः अश्वमुखनिर्गतवह्निः वाडवानल इत्यर्थः स इव प्रचण्डः दारुणो यः क्रोधः कोपः स एव अर्चिषां निचयः अग्निज्वालासमूहस्तस्य कवलत्वं ग्रासत्वं व्रजतु गच्छतु । पर्वतसङ्घर्षेण विसर्पिशिखः प्रान्तो वाडवानलो यथा समुद्वेलितं समुद्रजलसमूहं शोषणेन शमयति तथा मम कोपोऽपि समुत्पन्नसितं सैन्यकोलाहलं विमर्दनेन उपशमयिष्यतीति सरलार्थः ।

अत्रोपमाऽलङ्कारः, क्रोधार्चिर्निचय इति रूपकस्य चानयोरङ्गाङ्गिभावेन सङ्करः । तेन च इदानीमेव सर्वानेतान् विमर्दयामीति वस्तु व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ।

पुरा किल भगवानौर्वनामा मुनिश्रेष्ठो ऊरुं निर्भिद्य कुर्वन् समन्य, ततस्तस्मादुत्पन्नो वह्निर्जगन्ति दग्धुमुपचक्रमे, अथ भगवान् ब्रह्मा समागत्य समुद्रान्तर्गतवडवामुखे

इति परिक्रामति । (न)

चन्द्र । भो भोः कुमार ! --

अत्यद्भुतादसि गुणातिशयात् प्रियो मे
तस्मात् सखा त्वमसि यन्मम तत्तवैव ।
तत् किं निजे परिजने कदनं करोषि
नन्वेष दर्पनिकषस्तव चन्द्रकेतुः ॥१०॥

तस्य वसतिं समुद्रजलस्य च भक्ष्यत्वं निर्दिदेश इति पौराणिकी वार्त्ता । तथा च मत्स्यपुराणम् ।

'वड़वामुखेऽस्य वसतिः समुद्रे वै भविष्यति ।

* * * *

'एषोऽग्निरन्तकाले तु सलिलाशी मया कृतः ।"

शिखरिणी वृत्तम् ॥८॥

(न) इतीति । परिक्रामति सेनामाक्रमितुं पुनरितस्ततः पादक्षेपं करोति ।

अत्यद्भुतादिति । अत्यद्भुतात् एकाकिना महादुर्द्धर्षसेनाविमर्द्दनेन नितान्तविस्मया-वहात् गुणानां शौर्य्यादीनां अतिशयादतिरेकात् त्वं मे मम प्रियः सखा दयितं मित्रमसि सखित्वेन त्वामहमङ्गीकरोमीत्यर्थः, तस्माद्धेतोः यत् वस्तु मम तदेव तव, आवयोरुभयो-रेव परस्परमभिन्नहृदयत्वं नास्ति भेदादिति भावः । तस्मात् किं कथं निजे स्वकीये परि-जने परिवाररूपे अखिले सैन्यवर्गे कदनं विमर्द्दनं करोषि स्वजनपीड़नं नितान्तमनु-चितमिति भावः । ननु सैन्यविमर्द्दनं विना मम दर्पकण्डूया न निवर्त्तते इत्याह नन्विति । ननु सम्बोधने । एष चन्द्रकेतुः तव दर्पस्य वीरत्वाभिमानस्य निकषः निकष-पाषाणः परीक्षास्थानमित्यर्थः । नितान्तसामान्यतया सैन्येषु न खलु तव दर्पपरीक्षा भवेत् किन्तु अहं ते दर्पं परीक्ष्य तं चूर्णयामीति भावः ।

अत्र चन्द्रकेतौ निकषत्वारोपस्य प्रकृतदर्पपरीक्षोपयोगितया परिणामाऽलङ्कारः

लवः । सहर्षसम्भ्रमं परावृत्य । अहो ! महानुभावस्य प्रसन्नकर्कशा वीरवचनप्रयुक्तिर्विकर्त्तननकुलकुमारस्य (१) तत् किमेभिः, एनमेव तावत् सम्भावयामि । (प)

पुनर्नेपथ्ये कलकलः ।

लवः । सक्रोधनिर्वेदम् । आः ! कदर्थितोऽहमेभिर्वारं वारं (२) वीरसंवादविघ्नकारिभिः । तदभिमुखं परिक्रामति । (फ)

तदित्यनेनान्वितस्य एवशब्दस्य तदित्यतः परमेव पाठो युक्तः, किन्तु तवशब्दात् परं पाठेन अक्रमतादोषः, स च 'यन्मम ते तदेव' इति पाठेन समाधेयः ।

वसन्ततिलका वृत्तम् ॥ १० ॥

(प) लव इति । वीरस्य समानवीरान्तरलाभे हर्षः स्वाभाविकः, युद्धकरणाय सम्भ्रमस्त्वरा, ताभ्यां सहेति सहर्षसम्भ्रमं परावृत्य चन्द्रकेतोरभिमुखीभूय । महान् अनुभावः प्रभावो यस्य तस्य विकर्त्तननकुलकुमारस्य सूर्यवंशीयबालकस्य प्रसन्ना सखित्वस्थापनोपन्यासेन स्नेहव्यञ्जिका कर्कशा वीरत्वगर्वेण परुषा वीरवचनप्रयुक्तिः 'मर्त्यं च दर्पनिकष' इत्यादिवीरजनोचितवाक्यव्यवहारः अहो विस्मयावहा इत्यर्थः, सगमविमर्द्दनदर्शनेऽपि सखित्वस्थापनाभिप्रायप्रकाशात् ईदृशदारुणकर्म्मदर्शनेऽपि निर्भयहृदयत्वाच्चेति भावः । तत्तस्मात् एभिः क्षुद्रसैनिकैः किं मम प्रयोजनमित्यर्थः, एनं चन्द्रकेतुमेव सम्भावयामि युद्धकरणेन सम्मानयामि । पण्डितस्य शास्त्रालापेनेव योद्धुर्युद्धेनैव सम्माननं स्यादिति भावः ।

"अनुभावः प्रभावेऽपि" इत्यमरः ।

प्रसन्नकर्कशेति शेषपदस्य विशेष्यत्वविवक्षया कर्म्मधारयः ।

(फ) लव इति । क्रोधेन कोपेन निर्वेदेन स्वावमाननया च सहेति सक्रोधनिर्वेदम् । एतावताऽपि कालेन एतान् सामान्यसैनिकान् प्रहारैः सर्वथैव अकर्म्मण्यान् कर्त्तुं न शक्तोऽस्मीति मत्वा महावीरस्य लवस्य आत्मनः शक्त्यल्पत्वप्रतीतेरवज्ञा च इत्यत एवेति बोध्यम् । "तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमानने"ति साहित्यदर्पणः ।

चन्द्र । आर्य्य ! दृश्यतामितद्द्रष्टव्यम् । (व)

दर्पेण कौतुकवता मयि बद्धलक्ष्यः
पश्चाद्बलैरनुसृतोऽयमुदीर्णधन्वा ।
द्वेधा समुद्धतमरुत्तरलस्य धत्ते
मेघस्य माघवतचापधरस्य लक्ष्मीम् ॥ ११ ॥

त्वा इति कोपसूचकमव्ययम् । वीरस्य चन्द्रकेतोर्यः संवादः युद्धाय सम्मेलनं युद्धकरणार्थं चन्द्रकेतुना सह सम्मेलनमित्यर्थः तस्य विघ्नकारिभिः मुहुर्मुहुर्बाधाप्रदानेन अन्तरायविधायिभिः एभिः सामान्यसैनिकैरहं वारं वारं पुनः पुनः, कुत्सितोऽर्थः क्षुद्रसैनिकैः सह संग्रामरूपो विषयो यस्य स कदर्थः, स कृत इति कदर्थितः इत्यन्तात् कदर्थशब्दात् कर्मणि क्तः । विडम्बितोऽस्मीत्यर्थः । तदेतेषां समुचितप्रतिविधानं मयेदानीं विधेयमिति भावः । तदभिमुखं सैन्यान् प्रतीत्यर्थः ।

(व) चन्द्रेति । द्रष्टव्यं दर्शनोचितम् एतत् लवस्याचरणं दृश्यताम् । अतीवविस्मयावहं लवस्य तदाचरणमिति भावः ।

तद्विस्मयावहत्वं प्रतिपादयति दर्पेणेति । चन्द्रकेतुः कीदृशो वीर इत्यवबोधाय कौतुकम् औत्सुक्यमस्यास्तीति कौतुकवान्, तेन, दर्पेण वीरत्वगर्वेण हेतुना मयि बद्धलक्ष्यः कृतदृष्टिपातः, तथा पश्चात् पृष्ठभागे बलैरस्मदीयसैन्यैः, अनुसृतः अनुधावितः समाक्रान्त इत्यर्थः उदीर्णं बाणक्षेपाय उत्तोलितं धनुर्येन स उदीर्णधन्वा अयं लवः द्वेधासमुद्धतेन द्विप्रकारेणोत्थितेन मरुता वायुना कारणेन तरलस्य चलितस्य मघवा इन्द्रस्येदमिति माघवतं चापं धनुर्धरतीति माघवतचापधरस्य मेघस्य लक्ष्मीं शोभां धत्ते वहति । पूर्वदिगुत्थितवायुना पश्चिमायां दिशि एकवारं चालितः द्वितीयवारञ्च पश्चिमदिगुत्थितवायुना पूर्वस्यां दिशि चालितः इन्द्रधनुःशाली [illegible] इव शोभां धत्ते नवजलधरश्यामसुन्दरवपुरयं लवोऽपि सम्मुखवर्तिनं मां प्रत्येकवारं धनुरुत्तोलयन्पुनः पृष्ठदेशादाक्रमणकारिणः सैनिकान् प्रति धनुरुत्तोलयन् तादृशीं शोभां धत्त इति सरलार्थः । सुतरां आश्चर्य्यमेवैतदस्याचरणमिति भावः ।

सुम। कुमार एवैनं द्रष्टुमपि जानाति, वयन्तु केवलं परवन्तो विस्मयेन। (भ)

चन्द्र। भो भो राजानः!।

संख्यातीतैर्द्विरदतुरगस्यन्दनस्थैः पदाता-
वत्रैकस्मिन् कवचनिचितैर्मेध्यचर्म्मोत्तरीये। •

अत्र अन्यस्य लक्ष्मीं कथमन्यो धत्ते इति वस्तुसम्बन्धोऽसम्भवन् मेघस्य लक्ष्मीमिव लक्ष्मीमिति सादृश्याक्षेपान्निदर्शनाऽलङ्कारः तथा मेघमाधत्ते इति व्यञ्जनानां सकृदनेकधा साम्यात् छेकानुप्रासश्च, अनयोः संसृष्टिः।

दर्पकौतुकयोरेकत्ववाक्यवृत्तिधर्म्मत्वात् दर्पस्य सामानाधिकरण्यसम्बन्धेन कौतुकवत्त्वं बोध्यम्।

वसन्ततिलका वृत्तम् ॥ ११ ॥

(भ) सुमेति। अपिशब्दः सम्भावनायाम्। कुमारो भवानेव ननु मादृश इत्येवशब्दार्थः एनं लवं द्रष्टुं जानाति दृशा यथार्थं तथा परिचेतुमर्हतीत्यर्थः अपि इत्यहं सम्भावयामीत्यर्थः। वीरो वीरेणैव परिचेतुं शक्यते न तु मादृशदुर्वलजनेनेतिभावः। तु किन्तु वयं अहमित्यर्थः। "वास्मदर्थे" इति बहुवचनं विस्मयेन अस्याद्भुतकर्म्मदर्शनेन परवन्तः पराधीनाः जड़भावमापन्ना जाता इत्यर्थः। अस्यै तावदद्भुतकार्य्यदर्शनेन मम एतावान् विस्मयो जातः येन 'अयं कीदृश' इति निर्णेतुमपि न शक्नोमीति भावः।

संख्येति। संख्यामतीता इति संख्यातीतास्तैरसंख्यैः, द्विरदा गजाः, तुरगा घोटकाः स्यन्दना रथा इति द्विरदतुरगस्यन्दनं तस्मिन् तिष्ठन्तीति तैस्तथोक्तैः, कवचनिचितैः वर्म्मावृतगात्रैः कालज्येष्ठैर्वयोवृद्धैः भवद्भिः, एकस्मिन् द्वितीयसहाय-रहिते पदातौ पादचारिणि भूतलस्थित इत्यर्थः मेध्यं पवित्रं चर्म्म मृगाजिनं उत्तरीयं प्रावारो यस्य तस्मिन्, अभिनवेन किशोरत्वात् नव्येन वयसा कान्तः कमनीयः कोमल इति यावत् कायः शरीरं यस्य तस्मिन्, अत्र अयि यान् दृश्यमाने

कालज्येष्ठै रभिनववय: (१) काम्यकायै भवद्भि-
र्योऽयं बद्धो युधि परिकरस्तेन वो धिग् (२) धिगस्मान्॥१२॥

लव: । सक्षोभम् । (३) कथमनुकम्पते नाम । विचिन्त्य । भवतु, कालहरणप्रतिविधाय जृम्भकास्त्रेण तावत् सैन्यानि संस्तम्भयामि । इति ध्यानं नाटयति । (म)

अत्र युधि युद्धे योऽयं परिकर: आरम्भो बद्ध: कृत: तेन हेतुना वो युष्मान् धिक्, तथा अस्मान् मामपि धिक् निन्दामीत्यर्थ: । भवादृशामन्यायसमरप्रवृत्तानां नेतृत्वात् तथा यूयमसंख्या: अयन्तु एक: यूयं हस्त्यश्वरथारोहणात् अक्लान्तदेहा: अयन्तु चरणाभ्यां सञ्चरणात् नितान्तक्लान्तदेह: यूयं दुर्भेद्यकवचावृतगात्रा: एष तु सामान्यमृगचर्ममात्रावृतगात्र:, यूयं वयोवृद्धत्वेन पूर्णावयवत । चिरायापि श्रमसहा: अमी तु बालकत्वात् कोमलकलेवरतया सहसैव श्रमक्लान्त इति युष्माकमनेन सार्द्धं समरं कथमपि न सङ्गच्छत इति भाव: ।

अत एवात्र विषमालङ्कार: ।

“ परिकर: ......समारम्भ” इति शब्दकल्पद्रुम: ।

मन्दाक्रान्ता वृत्तम् ॥ १२ ॥

(म) लव इति । क्षोभेण चित्तचाञ्चल्येन ममासामर्थ्यं जानता चन्द्रकेतुनाऽहमवज्ञात इत्यवधारणात् मनोदु:खेन सह वर्त्तत इति सक्षोभम् । नामात्र क्रोधसूचकम् । कथं केन हेतुना अनुकम्पते दयते मां प्रति दयां कुरुते चन्द्रकेतुरित्यर्थ: । लोके दुर्बलं प्रत्येव दया दृश्यते किन्तु नखल्वहं दुर्बल इति भाव: । विचिन्त्य विविच्य । भवतु मां प्रति दया वा क्रोधो वेति शेष: न तेन किञ्चिन्ममायाति याति वेति भाव: । कालहरणप्रतिविधाय एभि: सह युद्धेन अनर्थककालविलम्बनिवृत्तये । तावत् सैन्यानि

---

(१) क्वचित् कुलपदं नास्ति । (२) पुस्तकान्तरे वारं वीरेति नास्ति ।

सुम। तत् किमकस्मादस्मत्सैन्यघोषः प्रशाम्यति । (य)

लवः । पश्याम्येनमधुना प्रगल्भम् । (र) (१)

सुम । ससम्भ्रमम् । वत्स ! मन्ये कुमारेणानेन जृम्भकास्त्रमामन्त्रितम् । (ल)

चन्द्र । अत्र कः सन्देहः । (व)

व्यतिकर इव (२) भीम स्तामसो वैद्युतश्च
प्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति ।

सर्वाण्यस्त्राणि संस्तम्भयामि मोहविस्रवशेन अकर्मण्यानि करोमि, तदा न इथाकालक्षेपं कर्तुं शक्नुयुरिति भावः । ध्यानं नाटयति ध्यानभावम् अभिनयति ।

(य) सुमेति । तत्तदा त्वत्कर्तृकाधिकारमात्र एवेत्यर्थः, किं कथम् अकस्मात् हठात् अस्मत्सैन्यानां घोषः कोलाहलः प्रशाम्यति विरमति ।

(र) लव इति । प्रगल्भं धृष्टं साहङ्कारं भाषभाषमित्यर्थः, एनं चन्द्रकेतुं अधुना पश्यामि अस्य कियत्परिमितं बलमस्तीति परीक्ष इत्यर्थः । जृम्भकास्त्रेण मोहापन्नतया सैन्यैः कालक्षेपकरणासम्भवात् अस्य परीक्षाया अयमेवावसर इति भावः ।

(ल) सुमेति । ससम्भ्रमं त्वरया सहितम् । आमन्त्रितं मन्त्रपाठद्वारा समाहूतं प्रयुक्तमित्यर्थः ।

(व) चन्द्रेति । अत्र जृम्भकास्त्रप्रयोगविषये ।

स्वयमपि जृम्भकास्त्रप्रयोगमेव समर्थयति व्यतिकर इति । भीमो भयानकः, तमसोऽन्धकारस्यायमिति तामसः, विद्युतस्तडितोऽयमिति वैद्युतश्च व्यतिकरः समवायः तमस्तेजसोर्गाढसंयोग इत्यर्थः, इव सैन्यमध्ये प्रणिहितमपि क्षिप्रमर्थमेतैर्निस्पन्दा नीरवाश्च जाता इति निश्चयाय सावधानतया निक्षिप्तमपि चक्षुः नयनं आदौ ग्रस्तं

---

(१) अप्रगल्भमिति पाठान्तरम् । (२) व्यतिकर इवेति पाठभेदः ।

अथ लिखितमिव तत् सैन्यमस्पन्दमास्ते
नियतमजितवीर्यं (१)जृम्भते जृम्भकास्त्रम् ॥ १२ ॥

आश्चर्य्यमाश्चर्य्यं । (ग)

पातालोदरकुञ्जपुञ्जिततमःश्यामैर्नभो जृम्भकै-
रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः ।

अन्धकारेणावृतं दृष्टिशक्तिशून्यीकृतमित्यर्थः अनन्तरं मुक्तं परित्यक्तं तमोरूपावरणात् बहिष्कृतं उपस्थितदृष्टिकमित्यर्थः कृत्वा हिनस्ति निपीड़यति । अथेति वाक्यान्तरारम्भे । एतत् सैन्यम् इदमस्मदीयं बलं लिखितमिव चित्रितमिव निःस्पन्दमस्तं निश्चलमवतिष्ठते अत एव अजितवीर्य्यं महाप्रभावं जृम्भकास्त्रं नियतं जृम्भते निश्चितं प्रादुर्भवति । अन्यथा सर्वेषामीदृशी दशा न स्यादिति भावः ।

अत्र लिखितमिवेत्युपमा, तस्याश्च विवक्षितवशात् तत्कारणीभूतजृम्भकास्त्र-प्रादुर्भावरूपसाध्यस्य कार्य्यीभूत सैन्यनिस्पन्दत्व-चक्षुःपीड़ाकरत्वरूपसाधनेन ज्ञानादनुमानालङ्कारः, अनयोरङ्गाङ्गिभावेन सङ्करः, जृम्भजृम्भेतिच्छेकानुप्रासश्च तेन संसृष्टिः ।

"व्यतिकरः । व्यतिसङ्ग" इति शब्दकल्पद्रुमः ।

मालिनी वृत्तम् ॥२२॥

(ग) आश्चर्य्यमाश्चर्य्यमित्यतिशये द्विरुक्तिः ।

पातालोदरेति । पातालस्य स्वाभाविकान्धकारविशिष्टस्य रसातलस्य उदरे मध्ये यानि कुञ्जानि लतादिसमाच्छादितस्थानानि तत्र पुञ्जितानि राशीकृतानि यानि तमांसि अन्धकाराः तानीव श्यामानि अतीवकृष्णवर्णानि तैः । अन्धकाराणामतीव गाढ़त्वप्रतिपादनार्थं पातालोदरादिग्रहणम् । तथा उत्तप्तं वह्नितापादुष्णीभूतं अत एव स्फुरत् दीप्यमानं यत् आरकूटं पित्तलं तस्य यत् कपिलं पिङ्गलवर्णं ज्योतिस्तेजः तद्वत् ज्वलन्ती प्रकाशमाना दीप्तिः प्रभा येषां तैः तथाभूतैः जृम्भकैः जृम्भकास्त्रैः, कल्प

---

(१) अजितवीर्य्यमिति पाठान्तरम् ।

कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरवाकीर्य्यते (१)
मीलन्मेघ (२) तड़ित्कड़ारकुहरैर्विन्ध्याद्रिकूटैरिव ॥१४॥
सम । कुतः पुनरस्य जृम्भकाणामागमः स्यात् ? । (ष) (३)

ब्रह्मणोदिनं ब्रह्मणोदिनवर्त्ति सचराचरं जगदित्यर्थः आक्षिपन्ति उत्तोलनादिना संहरन्ति ये ते कल्पाक्षेपाः कल्पक्षयाः, कठोरा दृढाः, भैरवा भयङ्करा ये मरुतः मिलि-तानपवनाः शब्दायव: तैः तथोक्तैर्मरुद्भिः व्यस्तैः विन्ध्याद्रिगात्रात् निक्षिप्तैः मीलन्तः संयुज्य-माना मेघाः कृष्णवर्णवारिदा येषु ते, तथा तड़िद्भिः तेषां मेघानां विद्युद्भिः कड़ाराणि पिङ्गलवर्णानि कुहराणि गुहा येषां ते, मीलन्मेघाश्च ते, तड़ित्कड़ारकुहराश्चेति तैः तथोक्तैः विन्ध्याद्रेः विन्ध्यपर्वतस्य कूटैः शृङ्गैरिव नभः गगनतलम् अवाकीर्य्यते आच्छन्नं क्रियते । अतीव भीषणानि जृम्भकास्त्राणीति भावः ।

अत्र भावाभिमानिनो वाच्या इत्योत्प्रेक्षाऽलङ्कारः । तथा प्रथमपादे कुत्रपुत्रेति-च्छेकानुप्रासः अन्यपादेषु तु वृत्त्यनुप्रास इत्यनयोः संसृष्टिः ।

"प्रचण्डपवनो राजन् ततो वर्षशतं पुनः ।
संवर्त्तको नाम महान् ब्रह्माण्डं चालयिष्यति ॥"

इति पद्मपुराणादिवचनात् प्रलयकाले वायुना शैलशृङ्गादिनिक्षेपस्य वास्तवकत्वाद्वोपमालङ्कार इति केचित् प्रलपन्ति ।

'रीतिः स्त्रियामारकूटः न स्त्रियां" ।'कुहरं शुषिरं विवरं बिलम् ।'

"कड़ारः कपिलः पिङ्ग पिशङ्गौ कद्रुपिङ्गलौ"विति चामरः । 'कल्पः शास्त्रे विधौ न्याये संवर्त्तेः ब्रह्मणो दिने")इति मेदिनी ।

शार्दूलविक्रीड़ितं वृत्तम् ॥१४॥

(ष) सुमेति । अप्रथमे पुनःशब्दः 'पुनरप्रथमे भेदे"इत्यमरकोषात् ।

---

(१)अवास्तीर्य्यते इति क्वचित् पाठः । (२) लीलाम्भोद इति पाठभेदः ।
(३) जृम्भकास्त्राधिगम इति पाठान्तरम् ।

चन्द्र। भगवतः प्राचेतसादिति मन्यामहे। (ख)

सम। नास्य व्यवहारोऽस्त्रेषु, विशेषतो जृम्भकेषु। यतः,--(ह)

कृशाश्वतनया ह्येते कृशाश्वात् कौशिकं गताः।

अथ तत्सम्प्रदानेन रामभद्रे व्यवस्थिताः (१) ॥ १५ ॥

प्रथमं रामभद्रो विश्वामित्रात् प्राप्तः, पुनर्द्वितीयवारम् अस्य लवस्य कुतः कस्मात् जनात् जृम्भकास्त्राणां जृम्भकास्त्राणाम् आगमः प्राप्तिः।

चन्द्रेति। प्राचेतसात् वाल्मीकेः, अस्य जृम्भकाणामागम इत्यन्वयः।

(ह) सुमेति। अस्य वाल्मीकेः अस्त्रेषु न व्यवहारः, अस्त्राणां संयामं न कुरुते इत्यर्थः जृम्भकेषु अस्त्रेषु विशेषतः व्यवहारो नास्त्येवेत्यर्थः। वाल्मीकिः सर्वज्ञतया सर्वं धनुर्वेदादिकं जानात्येव किन्तु स्वयमसौ अस्त्रं प्रयुक्तवान् किम्वा परस्मै समुपदिष्टवानिति न श्रूयते, अतएव यस्मात् लवस्य जृम्भकास्त्रप्राप्तिरिति न सम्भवत्येवेति भावः। वाल्मीके र्जृम्भकव्यवहारासम्भवं दर्शयति यत इति।

कृशाश्वेति। एते जृम्भकास्त्रपदार्थाः कृशाश्वस्य प्रजापते तनयाः पुत्ररूपेणोत्पन्नाः तस्माच्च कृशाश्वात् कौशिकं विश्वामित्रं गताः। अथ अनन्तरं तस्य विश्वामित्रस्य सम्प्रदानेन वितरणेन हेतुना रामभद्रे व्यवस्थिताः रामभद्रस्य प्रयोज्या इत्यर्थः; अतो वाल्मीकेर्व्यवहारोऽसम्भव एवेति भावः।

अत्र जृम्भकाणां कृशाश्वादिष्वनेकेषु गमनात् पर्यायनामाऽलङ्कारः। तथा निष्प्रयोजनहिशब्दप्रयोगात् निरर्थकत्वदोषः, किञ्च पुनः कृशाश्वादित्युपादानात् कथितपदतादोषश्च तेन च 'कृशाश्वतनया एते तस्माच्च कौशिकं गता इति पाठः साधीयान्।

प्रथमतो ब्रह्मा जृम्भकास्त्राण्युत्पादयामास, ततस्तान्येव दक्षकन्यायां जयायां सुप्रभायाञ्च पत्न्यां कृशाश्वस्य पुत्रत्वं ययुः, तस्माच्च कृशाश्वात् तान्यस्त्राणि विश्वामित्रो लेभे विश्वामित्रेण च ताडकावधात् पूर्वं रामाय प्रदत्तानीति रामायणवार्त्ता ॥१५॥

---

(१) अथ तत् सम्प्रदायेनेति, रामभद्रे स्थिता इति, इति च पाठभेदो।

चन्द्र । अपरेऽपि परमोपचीयमानसत्त्वप्रकाशाः स्वयं हि मन्त्रदृशः पश्यन्ति । (१) (क)

सुम । वत्स ! सावधानो भव, परागतः प्रवीरः । (ख)

कुमारौ । अन्योन्यं प्रति । अहो प्रियदर्शनः कुमारः । (ग)

सस्नेहानुरागं निर्वर्ण्य ।

यदृच्छासंवादः किमु, किमु गुणानामतिशयः,
पुराणो वा जन्मान्तरनिविड़बन्धः परिचयः ।

(क) चन्द्रेति । अपरेऽपि अन्येऽपि वाल्मीकिभिन्ना अपौरुषेयाः परमं सातिशयं उपचीयमानस्य रजस्तमसोऽनभिभवेन वर्द्धमानस्य सत्वस्य सत्त्वगुणस्य प्रकाश आविर्भावो येषु ते तथोक्ताः, योगाभ्यासेन लब्धकेवलसत्त्वगुणप्रकाशा इत्यर्थः; मन्त्रदृशः महाप्रभाव-वेदादिमन्त्राणां ज्ञातारः योगिन इति शेषः स्वयं हि आत्मनैव पश्यन्ति जानन्ति, योगिनः परोपदेशमन्तरेण स्वयमेव सत्त्वप्रकाशे संयमविधानेन जगतां सर्वमेवाव-गच्छन्तीत्यर्थः । सुतरां लवस्य वाल्मीकिभिन्नादपि कस्माच्चित् योगिजनात् जृम्भकास्त्राणां प्राप्तिर्भवेदिति सम्भाव्यत इति भावः ।

सत्त्वप्रकाशसंयमस्य फलमाह पातञ्जलसूत्रम्—

"प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम् ।"

(ख) सुमेति । सावधानो भव आत्मरक्षां प्रति लवस्याक्रमणं प्रति च एकाग्र-चित्तो भव, यतः स प्रवीरः महावीरो लवः परागत उपस्थितः । अत्र वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ।

(ग) कुमाराविति । अहो प्रशंसायामहोशब्दः । प्रियं परमसुन्दरत्वात् सन्तोषकरं दर्शनमवलोकनं यस्य सः, कुमारो लवश्चन्द्रकेतुश्च ।

यदृच्छेति । एतस्मिन् लवे चन्द्रकेतौ च दृष्टे सति यदृच्छया दैववशेन संवादः

(१) प्रचीयमानसत्त्वप्रकाशाः स्वयं सर्वमन्त्रदृश इति पाठान्तरम् ।

निजो वा सम्बन्धः किमु विधिवशात् कोऽप्यविदितो
ममैतस्मिन् दृष्टे हृदयमवधानं रचयति ॥ १६ ॥

सुम । भूयसा जीविधर्म्म एषः, यद्रसमयी कस्यचित् क्वचित् प्रीतिः; यत्र लौकिकानामुपचार (१) स्तारामैत्रकं वा (२) चक्षूराग इति, तमप्रतिसंख्येयमनिबन्धनं प्रेमाणमामनन्ति । (घ)

जातं कुम्भलनं दैववशादेव आवयोरिदं सम्मिलनं जातं न तु किमपि निर्दिष्ट-कारणमस्यासीदिति भावः, किमु किम्, गुणानां अस्मिन् कुमारे विद्यमानानां शौर्य्यधैर्य्यादीनां अतिशय आधिक्यं, वा अथवा जन्मान्तरे अन्यस्मिन् जन्मनि निविड़ो दृढो बन्धः संश्लेषणं बन्धुत्वसूत्रेण बन्धनमित्यर्थः यस्मिन् सः तथोक्तः पुराणः प्राक्तनः परिचयः 'असौ स' इति विशेषज्ञानं वा किम्वा विधिवशात् अदृष्टाधीनत्वात् अविदितः अज्ञातः कोपि निजः स्वकीयः सम्बन्धः भ्रातृत्वादिः किमु किम्, मम हृदयं अन्तःकरणं अवधानं प्रणयैकायतां रचयति प्रापयति प्रणयैकायताविशिष्टं करोतीत्यर्थः । दृष्टमात्रमेव एनं कुमारं प्रति यन्मम हृदयमेकतानं आनन्दितञ्च जातं, तत्र किं अतीवशुभक्षणे जातसम्मेलनं कारणं, किम्वा अस्य असाधारणगुणग्राम एव हेतुः, अथवा जन्मान्तरीयः कोऽपि बन्धुत्वपरिचयो बीजं, आहोस्वित् अविज्ञातः कोऽपि भ्रातृत्वादिसम्बन्धः कारणं भवेदिति सरलार्थः, नखलु तन्निर्णेतुमर्हामीति भावः ।

अत्र वारं वारं किमुशब्दोपादानात् अनवीकृतत्वदोषः, किन्तु प्रथमचरणे 'किमु किमु' इत्यत्र 'किमुत नु' इति पाठेन तृतीयचरणे च 'किमु' इत्यत्र नन्विति पाठेन च दोषाभावः ।

शिखरिणी वृत्तम् ॥ १६ ॥

(घ) सुमेति । भूयसा बाहुल्येन एष वक्ष्यमाणः जीविधर्म्मः प्राणिनां स्वभावः, कोऽसावित्याह यदिति । कस्यचित् जनस्य क्वचित् कस्मिंश्चित् जने यत् रसमयी

---

(१) व्याहार इति पाठान्तरम् । (२) कस्मिंश्चित् पुस्तके वाशब्दो नास्ति ।

अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया।
स हि स्नेहात्मकस्तन्तुरन्तर्मर्माणि सीव्यति ॥ १७ ॥

कुमारौ। अन्योन्यं प्रति (१)

अनुरागात्मिका प्रीतिः प्रणयो जायते, स एष जीविधर्म्म इत्यर्थः। ननु कथमसौ जायत इत्याह यदेति। यत्र प्रेमणि तारयोः कनीनिकयोः मैत्रकं मित्रतेति तारामैत्रकं परस्परमिलितचक्षुस्ताराजन्यं बन्धुत्वमित्यर्थः, वाशब्दः समुच्चये, चक्षुषोः परस्परमिलितयोर्नयनयोरागोऽनुराग इति लौकिकानां लोकवृत्तान्ताभिज्ञानां उपचारो व्यवहारः। तथा च परस्परनयनतारासम्मेलनमात्रमेव (दृष्टिमात्रमेव) अन्योन्यस्य अन्योन्यं प्रति यः प्रणयो जायते, तस्य 'तारामैत्रकं चक्षूराग' इति च संज्ञाद्वयं लोकवृत्तान्ताभिज्ञैर्व्यवह्रियते इति निष्कर्षः। तं प्रेमाणं प्रणयं अप्रतिसंख्येयं इयत्तया संख्यातुमशक्यं अत्यधिकमित्यर्थः, निबध्यते अनेनेति निबन्धनं कारणं, अनिबन्धनं केनचित् कारणेन अनुत्पादितं ईश्वरेच्छया समुत्पन्नमित्यर्थः आमनन्ति ब्रुवन्ति लौकिकाचाराभिज्ञा इति शेषः। तादृशप्रीतौ ईश्वरेच्छैव कारणमिति भावः। "तारकाक्ष्णः कनीनिका"। "प्रेमा ना प्रियता हार्द्दं" मिति चामरः।

अस्यैव प्रेम्णो विशेषमाह अहेतुरिति। अहेतु र्निर्निमित्तकः उपकारः सौदरत्वादित्वम्बन्धरूपविशिष्टकारणं विना जायमान इत्यर्थः यः पक्षपातः परस्परं प्रणयः, तस्य पक्षपातस्य प्रतिक्रिया प्रतीकार उच्छेद इति यावत् नास्ति न वर्त्तते; तादृशप्रणयजनकेश्वरेच्छायाः सर्वदैव सत्त्वात्, उपकारादिरूपकारणजन्यप्रणयस्य तु समुच्छेदो भवत्येव तादृशकारणापाये अन्वयव्यतिरेकानुविधायित्वादिति भावः। हि यस्मात् स्नेहात्मकः तादृशपक्षपाताभिन्नः प्रगाढप्रणयरूप इति यावत् तन्तुः सूत्रं अन्तर्मर्माणि अभ्यन्तरसन्धिस्थानानि अन्योन्यस्य अन्तःकरणमिति यावत् सीव्यति ग्रथ्नाति, अतएव तादृश प्रणयभङ्गो नितरामसम्भव एव, स नु युवयो र्जात इति प्रतीयत इति भावः।

अत्र कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः अश्लिष्टशब्दनिबन्धन

---

(१) अन्योन्यसुहृद्यैति पाठान्तरम्।

एतस्मिन् मसृणितराजपट्टकान्ते
मोक्तव्याः कथमिव सायकाः शरीरे ।
यत्प्राप्तौ मम परिरम्भणाभिलाषात्
उन्मीलत् (१) पुलककदम्बमङ्गमास्ते ॥ १८ ॥

किन्त्वाक्रान्तकठोरतेजसि गतिः का नाम शस्त्रं विना,
शस्त्रेणापि हि तेन किं, न विषयो जायेत यस्येदृशः ।

चरम्परितरूपकञ्च परम्परारूपाकर्षणं सेवनत्वारोपं प्रति खं हि तन्तुत्वारोपस्य कारण-
त्वात्, अनयोश्चाङ्गाङ्गिभावेन सङ्करः ।

सीव्यतीति 'सिवु तन्तुसन्ताने, इत्यस्य प्रयोगः 'सेलाइ' इति तस्य वङ्गभाषा ॥१७॥

एतस्मिन्निति । मसृणितः चिक्कणः कृतः यो राजपट्टः मणिविशेषः स इव कान्तं मनोरमं तस्मिन्, एतस्मिन् शरीरे लवस्य चन्द्रकेतोश्च देहे कथमिव केन प्रकारेण इवशब्दो वाक्यालङ्कारे, सायकाः वाणाः मोक्तव्याः प्रहाराय निक्षेप्तव्याः मयेति शेषः कथमपि वाणा निक्षेप्तुं न शक्यन्ते स्नेहेन बाधाप्रदानादिति भावः । यस्य शरीरस्य प्राप्तौ लब्धौ परिरम्भणस्य आलिङ्गनस्य अभिलाषात् इच्छावशात् मम अङ्गं उन्मीलत् उत्थितत् पुलकानां रोमाञ्चानां कदम्बं समूहो यस्मिन् तत्तथोक्तं सत् आस्ते वर्त्तते ।

अत्र लुप्तोपमाऽलङ्कारः ।

".राजपट्टः । मणिविशेष " इति शब्दकल्पद्रुमः ।

मसृणः कृत इति मसृणितः करोत्यर्थे णिजन्तात् कर्म्मणि क्तः ।

प्रहर्षिणी वृत्तम् ॥ १८ ॥

किन्त्विति । भेदे किन्तुशब्दः, अस्मिन् स्निग्धकोमलकाये सायका मोक्तुं न शक्याः किन्तु इति पूर्वश्लोकेनान्वयः । आक्रान्तं बलेन आयत्तं कठोरं प्रचण्डं तेजो मदीयः प्रभावो येन तस्मिन् तथोक्ते, अश्वधारणेन मत्प्रभावाक्रमणकारिणि लवे युद्धाय स्पर्द्धा-

---

(१) आमन्ङ्गोत्पुलकेति पाठभेदः ।

किं वक्ष्यत्ययमेव युद्ध (१) विमुखं मामुद्यतेऽप्यायुधे
वीराणां समयो हि दारुणरसः स्नेहक्रमं बाधते ॥१८॥

(सुम.। (लवं निर्वर्ण्य सासूयमात्मगतम्) हृदय! किमन्यथा परिकल्पसे। (ङ)

पूर्वकाङ्क्षानेन मत्प्रभावाक्रमणकारिणि चन्द्रकेतौ चेति स्पष्टार्थः, शस्त्रं विना शस्त्रनिक्षेपमन्तरेण का गतिः क उपायः; सम्भावनायां नामशब्दः उपायान्तरं नास्त्येवेति सम्भाव्यत इत्यर्थः। ननु शस्त्रं परिहाय साम्ना सन्धिः क्रियतामित्याह अस्त्वेति। तेन शस्त्रेणापि, किं किं प्रयोजनमित्यर्थः; यस्य शस्त्रस्य ईदृश इत्यद्भुतो महावीरः विषयः प्रयोगस्थलं न जायते न भवेत्। यद्येतादृशेन महावीरेण सह न मे युद्धं स्यात् तर्हि युद्धमिदमेव निष्फलमिति भावः। युद्धाकरणे दोषान्तरमाह किमिति। आयुधे उद्यतेऽपि मां प्रति निक्षेपाय अनेन शस्त्रे उत्तोलितेऽपि युद्धविमुखं संग्रामपराङ्मुखं मां अयमेव 'तिष्ठन्तु तावदन्ये, मत्समानः प्रतिपक्षो बलगर्वित एष एव वीरः किं वक्ष्यति, भीतोऽयं कापुरुषः संग्रामात् विरत इति वक्ष्यतीत्यर्थः अतएव युद्धादन्यदिदानीं न मे करणीयमस्तीति भावः। ननु तथात्वे प्रणयभङ्गो भवेदित्याह वीराणामिति। हि यस्मात् दारुणो निष्ठुरत्वात् भयङ्करः रसः क्रोधात्मिका मनोवृत्तिर्यस्मिन् स दारुणरसः वीराणां समय आचारः परस्परप्रहाररूपो व्यवहार इति यावत् स्नेहक्रमं प्रीतिपरम्परां बाधते उत्सादयति। सुतरामावश्यकत्वादङ्गीकरणीय एव प्रणयभङ्ग इति भावः।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः। द्वितीयपादे यच्छब्दघटितवाक्यस्य परत्र पाठात् विधेयाविमर्शदोषः पादपूरणमात्रार्थं कश्चिच्छब्दानर्थकत्वदोषश्च, तयोश्च "यस्य द्दक्प्रबलोभवेन्न विषयस्तेनापि शस्त्रेण कि" मिति पाठेन समाधानं स्यात्।

"समयाः शपथाचारकालसिद्धान्तसंविद" इत्यमरः।

शार्दूलविक्रीडितं वृत्तम् ॥ १८ ॥

(ङ) सुमिति। अन्यथा अपरिचितवीरबालकभिन्नप्रकारेण रामचन्द्र-पुत्रत्वेनेत्यर्थः किं कथं परिकल्पसि वितर्कयसि। तदसम्भवमिति भावः।

(१) किं वक्ष्यत्ययमेवमद्य विमुखमिति पाठान्तरम्।

मनोरथस्य यद्बीजं तद्दैवेनादितो हृतम् ।
लतायां पूर्वलूनायां प्रसूनस्यागमः कुतः ॥ २० ॥

चन्द्र । अवतराम्यहमार्य्य ! सुमन्त्र ! स्यन्दनात् । (च) (१)

सुम । तत् कस्य हेतोः ? । (छ)

चन्द्र । यतस्तावदयं वीरपुरुषः पूजितो भवति, अपि च खल्वार्य्य ! क्षात्रधर्म्मः परिपालितो भवति ; न रथिनः पादचारमायोधयन्तीति शास्त्रविदः परिभाषन्ते । (ज) (२)

तदसम्भवत्वं प्रतिपादयति मनोरथस्येति । मनोरथस्य एष शिशुवीरः सीतागर्भजातो रामचन्द्रस्य पुत्रो भवेदित्येवमभिलाषस्य यत् बीजं सीतारूपं कारणं, दैवेन दुरदृष्टेन आदितः प्रथमत एव तत् हृतं विनाशितम् । हिंस्रसमाकुलारण्ये एकाकिन्या निर्वासितायाः सीतायाः कथमपि जीवनधारणासम्भवात् एष तस्याः पुत्र इति कथमपि न सम्भवतीति भावः । इममर्थं दृष्टान्तेन द्रढयति लतायामिति । लतायां कस्याञ्चित् वल्लर्यां पूर्वं प्रागेव लूनायां छिन्नायां प्रसूनस्य पुष्पस्य आगम उत्पत्तिः कुतः कस्माद्धेतोर्भवेदित्यर्थः अपितु कथमपि नेत्यर्थः । यथा पूर्वलूनायां लतायां प्रसूनोत्पत्तिकामना असम्भवा तथा चिराय मृतायां सीतायां अस्याम्युत्पत्तिसम्भावना सर्वथैवासम्भवेति रामपुत्रत्वेनास्य सम्भावना भ्रममूलैवेति भावः ।

अतएव प्रतिविम्बनादत्र दृष्टान्तालङ्कारः । हृतलूनेत्युभयत्रापि निष्ठाप्रत्ययान्ततया आदिपदपूर्वपदानुपादानेऽपि यद्यपि अतीतत्वज्ञानं स्यात्, तथापि अवधारणार्थपरतया तयोर्निर्द्देशात् न अधिकपदत्वदोष इति सुधीभिर्विभावनीयम् ॥ २० ॥

(च) चन्द्रेति । स्यन्दनात् रथात् । अनुमतिप्रार्थनायं मुक्तिरियं चन्द्रकेतोः ।

(छ) सुमेति । तदवतरणम् । कस्य हेतोरिति षष्ठी हेतुप्रयोगे ।

(ज) चन्द्रेति । तावत् वाक्यालङ्कारे । पूजितः सम्मानितः । क्षात्र समाद-

---

(१) कश्चित् पुस्तके अहमिति पाठो नास्ति । (२) अपि खलु आर्य्य-

सुम। स्वगतम्। कष्टां दशामनुप्रपन्नोऽस्मि। (क) (१)
कथं न्याय्यमनुष्ठानं मादृशः प्रतिषेधतु।
कथं वाप्यनुजानातु साहसैकरसां क्रियाम्॥ २१॥

स्थलावतरणेन निर्लोकस्यपरिहारात् सम्मानं प्रदर्शितं स्यादिति भावः। क्षत्रियाणामय-
मिति क्षात्रः स चासौ धर्म्मोनियमश्चेति क्षात्रधर्म्मः परिपालितः सुरक्षितः। ननु कोऽसौ
क्षात्रधर्म्मः यदर्थं त्वमिदं साहसमनुष्ठातुमिच्छसीत्याह नेति। रथिनो रथारोहिणो
योद्धारः पादचारं पदातिं प्रतिपक्षयोद्धारमित्यर्थः न आयोधयन्ति न प्रहरन्ति इति
शास्त्रविदो मन्वादयः परिभाषन्ते सर्वथा ब्रुवन्ति। रथादवतरणे समानस्थान-
गतत्वात् तन्निषिद्धयुद्धभङ्गतः क्षात्रधर्म्मः परिरक्षितो भवेदिति भावः। तथा च मनुः—

"न च हन्यात् स्थलारूढं न क्लीबं न कृताञ्जलिम्।" इत्यादि।

"स्वयं रथस्थो रथं त्यक्त्वा स्थलारूढं न हन्या" दिति कुल्लूकभट्टः।

(क) सुमेति। कष्टां दशां दुःखकरीमवस्थां अनुप्रपन्नः प्राप्तः।

कथमेतदित्याह कथमिति। मादृशो युद्धधर्म्मज्ञो रघुकुलनियमज्ञश्च जनः न्यायोद-
नपेतं न्याय्यं सङ्गतम् अनुष्ठानं रथाच्चन्द्रकेतोरवतरणरूपं कार्य्यं कथं केन प्रका-
रेण प्रतिषेधतु निवारयतु निवारयितुं शक्नुयात् अपि तु कथमपि नेत्यर्थः। शास्त्रन्या-
यसिद्धकार्य्यनिषेधे विहितानुष्ठानप्रयोजकत्वेन प्रत्यवायः स्यादिति भावः। साहसं
हठकारित्वमेव एकः केवलः रसः अवतरणप्रवर्त्तको रागो यस्यां तां तथोक्तां क्रियां
रथादवतरणरूपं कार्य्यं कथं वापि अनुजानातु अनुमन्यताम्। रथादवतीर्णस्य चन्द्र-
केतोरीदृशेन महावीरेण सह समरे विपत्तिसम्भावनं वाधिकेति तदनुमन्तुमपि न शक्यते

क्षात्रधर्म्मश्चानुगृहीतो भवति। क्षात्रधर्म्मः समनुगतो भवति। रथिनः पादचारमभि-
युञ्जन्तीति विभिन्नाः पाठाः।

(१) कष्टं व्रतानुप्रपन्नः। विपदमनुपपन्न इति च पाठभेदौ।

चन्द्र । यदा तातमिश्रा अपि पितुः प्रियसखं (१) धर्म्मार्थ-संशयेष्वार्य्यमेव पृच्छन्ति, तत् किमार्य्यो विमृशति । (ञ)

सुम । आयुष्मन् ! एवं यथाधर्म्ममभिमन्यसे । (ट)

एष सांग्रामिको न्याय एष धर्म्मः सनातनः ।
इयं हि रघुसिंहानां वीरचारित्रपद्धतिः ॥ २२ ॥

अतएव तदुभयोरेकतरावधारणावश्यकत्वेऽपि तत्कर्त्तुमसामर्थ्यात्, कष्टां दशामनुप्रपन्नोऽस्मीति भावः ।

अत्र अर्थापत्तिश्चयस्य संसृष्टिरलङ्कारः ॥ २१ ॥

(ञ) चन्द्रेति । तातमिश्राः पूज्यास्ताताः रामादयोऽपि विशेषविचक्षणा इत्यर्थः, धर्म्मार्थसंशयेषु 'अत्र को धर्म्म' इति धर्म्मसंशयेषु 'अत्र किं कर्त्तव्यम्' इति कर्त्तव्यविषयसंशयेषु च सत्सु पितुः तेषां जनकस्य दशरथस्य प्रियसखं योग्यमन्त्रिणं न प्रियं मित्रं आर्य्यं भवन्तं पृच्छन्ति कर्त्तव्यं जिज्ञासन्ते धर्म्मार्थेषु भवतो-ऽभिज्ञानातिशयत्वादिति भावः । तत्तस्मात् आर्य्योभवान् किं कथं विमृशति विचिनत्ति । नैष दुरूहः प्रश्नः, न वा विवेचनावसरोऽस्तीति सत्वरमुत्तरं क्रियतामिति भावः ।

(ट) सुमेति । एवं रथादवतरणं यथाधर्म्मं धर्म्मानतिक्रान्तं धर्म्मसङ्गतमित्यर्थः अभिमन्यसे अभिमतं कृतवानसीत्यर्थः ।

धर्म्मसङ्गतत्वं प्रतिपादयति एष इति । सांग्रामिकः युद्धसंसृष्टः एष न्यायो नीतिः, रथारोहिणो यत् पदातिभिः सह न युध्यन्ते इयमेव युद्धनीतिरित्यर्थः, तथा एव सनातनः धर्म्मश्चमहावीरैश्चिराचरित इत्यर्थः धर्म्म आचारः ननु होलाकादिवत् आचारस्य देशभेदेन भिन्नत्वात् रघूणां क आचार इत्याह इयमित्यादि । रघुषु रघुवंशोद्भवेषु सिंहा इव तेषां रघुकुलश्रेष्ठानां इयं हि एषैव वीरचारित्रस्य वीरोचिताचारस्य

---

(१) प्रियं सखायमिति पाठान्तरम् ।

चन्द्र। प्रतिरूपं वचनमार्य्यस्य। (ठ)

इतिहासं पुराणञ्च धर्म्मप्रवचनानि च।

भवन्त एव जानन्ति रघूणाञ्च कुलस्थितिम् ॥२३॥

पद्धतिः पन्थाः, तव पूर्वपुरुषा अपि रथस्थाः सन्तः पदातिभिः सह समरं न कृतवन्त इति तव वंशपरम्पराप्रसिद्धोऽप्ययमाचार इति भावः।

चरित्रमेव चारित्रं प्रज्ञादित्वात् स्वार्थे अण् ॥२२॥

(ठ) चन्द्रेति। आर्य्यस्य भवतः वचनम् उक्तवाक्यं प्रतिरूपम् अनुरूपं योग्यमिति यावत्। धार्म्मिकस्य धर्म्मसङ्गतोक्तिरेव योग्येति भावः॥

अनुरूपवचनप्रयोगे कारणमाह इतिहासमिति। भवन्त एव नान्ये साधारणा इत्येव-शब्दार्थः गौरवात् बहुवचनम् इतिहासं पूर्ववर्त्तिनीं घटनापरम्परां पुराणं स्वनाम्ना प्रसिद्धं पञ्चलक्षणं शास्त्रविशेषं, धर्म्माः वर्णानामाश्रमाणाञ्च शौचाचारादयः प्रोच्यन्ते एभिरिति धर्म्मप्रवचनानि मन्वादिशास्त्राणि रघूणां राघवाणां कुलस्थितिं वंशपरम्परा-प्रसिद्धरीतिञ्च जानन्ति विदन्ति। सुतरामुक्तवचनप्रयोगे भवतां सामर्थ्यमस्त्येवेति भावः।

अत्र जानन्तीत्येकया क्रियया इतिहासादीनां कर्म्मतया सम्बन्धात् तुल्ययोगिता-लङ्कारः। जानन्तीत्यनेन समाप्तस्य वाक्यस्य पुनः रघूणाञ्चेत्यादिना उपात्तत्वात् समाप्तपुनरात्ततादोषः स च 'कुलस्थितिं रघूणाञ्च भवन्तः खलु जानते" इति पाठेन समाधेयः।

इतिहासलक्षणमुक्तमभियुक्तैर्यथा—

',धर्म्मार्थकाममोक्षाणामुपदेशसमन्वितम्।
पुरावृत्तकथायुक्तमितिहासं प्रचक्षते॥"

पुराणलक्षणममरकोषटीकायां रघुनाथधृतम् —

"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितञ्चेव पुराणं पञ्चलक्षणम्॥" ॥२३॥

सुम। सर्वं हास्यं परित्यज्य। (ङ)

जातस्य ते पितुरपीन्द्रजितो निहन्तु-(१)
वत्सस्य वत्स! कति नाम दिनान्यमूनि।
तस्याप्यपत्यमनुगच्छति वीरवृत्तं (२)
दिष्ट्या गतं दशरथस्य कुलं प्रतिष्ठाम् ॥२४॥

चन्द्र। सकष्टम्।

अप्रतिष्ठे रघुज्येष्ठे (३) का प्रतिष्ठा कुलस्य नः।
इति दुःखेन तप्यन्ते त्रयो नः पितरोऽपरे ॥२५॥

(ङ) सुमेति। हर्षेण वात्सल्येन गर्वेण आनन्दाश्रुणा च सहितं सर्वं हास्यं परित्यज्य आलिङ्ग्य चन्द्रकेतुमिति शेषः।

जातस्येति। हे वत्स! चन्द्रकेतो! इन्द्रजितो युद्धे देवराजविजेतुः रावणपुत्रस्य मेघनादस्य निहन्तुर्विनाशयितुः वत्सस्य स्नेहास्पदस्य ते तव पितुस्तातस्य लक्ष्मणस्यापि जातस्य उत्पन्नस्य सतः अमूनि दिनानि कति नाम, कियन्ति सम्भावयामि, तव पितुर्लक्ष्मणस्यापि जन्मतः प्रभृति वर्त्तमानदिनपर्य्यन्तानि नितान्ताल्पान्येव दिनानीत्यर्थः: इतो मध्य एव स इन्द्रस्य विजेतारं महावीरं मेघनादं निहतवानिति महदेवाश्चर्य्यमिति भावः। तस्यापि तादृशनितान्ताल्पवयसो लक्ष्मणस्यापि अपत्यं पुत्रः वीरवृत्तं वीरोचितमाचारम् अनुगच्छति अनुसरति पालयति, अतएव दिष्ट्या भाग्येन दशरथस्य कुलं वंशः प्रतिष्ठां स्थितिं स्थायित्वमिति यावत् गतं प्राप्तम्, इत्यस्माकं महत् आनन्दकारणमिति भावः।

अत्र चतुर्थपादार्थं प्रति पूर्ववाक्यार्थौ हेतुरिति वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः। वसन्ततिलकावृत्तम् ॥२४॥

अप्रतिष्ठ इति। रघुज्येष्ठे रघुकुलप्रधाने रामे अप्रतिष्ठे अपत्याभावेन स्थिति-

---

(१) विजेतुरिति पाठान्तरम्। (२) अनुतिष्ठति वीरधर्ममिति पाठभेदः। (३) कुलज्येष्ठे इति पाठान्तरम्।

सुम। अहह! हृदयमर्म्मदारणान्येतानि चन्द्रकेतोर्वचनानि। (ढ) [१]

लवः। हन्त! मिश्रीकृतो रसो [२]वर्त्तते। [ण]

यथेन्दावानन्दं व्रजति समुपोढ़े कुमुदिनी
तथैवास्मिन् दृष्टिर्मम, कलहकामः पुनरयम्।

रद्धिति सम्भाव्यमानवंशलोपसन्तापे इत्यर्थः, नः अस्माकं कुलस्य सूर्य्यवंशस्य का प्रतिष्ठा स्थितिः, सर्वगुणाकरस्य रामस्य निःसन्तानतया अस्मत्सन्तानानां सताम् अपि असत्कल्पत्वेन मन्यमानत्वादिति भावः। इति दुःखेन हेतुना नोऽस्माकं 'वाष्पदर्घ्य'ति बहुवचनं समीचीनं: अपरे रामादन्ये अयः पितरः पितृपर्य्यायी भरतशत्रुघ्नौ पिता लक्ष्मणश्चेत्यर्थः; तस्मात् सन्तापमनुभवन्ति।

अत्र करुणोरसः रामविषयरतिभावस्याङ्गमिति रसवदलङ्कारः। तथा रघुज्येष्ठपदेन किं दिलीपपुत्रस्य रघोर्ज्येष्ठो भ्राता उच्यते किं वा रामः, अथवा अपरः कश्चिदिति सन्देहात् सन्दिग्धत्वदोषः स च 'अप्रतिष्ठेऽयजे रामे' इति पाठेन समाधेयः ॥२५॥

(ढ) सुमीति। अहहेति खेदसूचकमव्ययम्। हृदयस्य मर्म्माणि सन्धिस्थलानि दार्य्यन्ते भिद्यन्ते एभिरिति हृदयमर्म्मदारणानि, एतद्वचनश्रवणेन दुःखेन हृदयमर्म्मस्थलं विदीर्णमिवानुभूयत इत्यर्थः।

(ण) लव इति। हन्तेति हर्षसूचकमव्ययम्। रसो वात्सल्यरसः मिश्रीकृतः वीररसेन सम्मिलितः सन् वर्त्तते।

रसयोर्मिश्रीकृतत्वं व्यनक्ति यथेति। इन्दौ चन्द्रे समुपोढे उदिते कुमुदिनी कुमुदवती आनन्दं प्रफुल्लतां व्रजति प्राप्नोति, तथैव अस्मिन् कुमारे मम दृष्टिः आनन्दं प्रीतिविस्फारितत्वं व्रजति। पुनः किन्तु कलहं वैरेण समरं कामयते अभिलषति यः सः कलहकामः सन् अयं वाहुभुजः आयत्कारिणा आपाततायशब्देन क्रूरं कर्कशं यथा स्यात्तथा क्वणितः शब्दायमानो यो गुणः मौर्वी तेन गुरुत् गर्जत् यत् गुरु विशालं धनुः

---

(१) हृदयमर्म्मदारुणानि इति पाठभेदः। (२) रसक्रम इति विभिन्नः पाठः।

झणत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनु-
र्धृतप्रेमा बाहुर्विकचविकरालोल्वणरसः [१] ॥२६॥

चन्द्र । अवतरन्। [२] आर्य्य ! सावित्रश्चन्द्रकेतुरभिवा-
दयते । [त]

तस्मिन् धृतं निहितं प्रेम ग्रहणाभिलाषो येन स तथोक्तः, तथा विकचः प्रस्फुटः विकरालः तुङ्गः अतिमहान् इत्यर्थः उल्वणरसः नियतसहचरेण रौद्ररसेन समुद्धतो वीररसो यस्मिन् स तथोक्तश्च जात इति शेषः । यथैनं महावीरं कमनीयकलेवरं कुमारमवलोक्य मम नयनमानन्दविस्फारितं जातं, तथा बाहुरपि अविरतधनुर्ज्याशब्देन दिङ्मण्डलमापूर्य महासमराय समुत्सहते इति निष्कर्षः । अतएव वात्सल्यवीररसयोरिदानीं सम्मेलनं जातमिति भावः ।

अत्र वात्सल्यवीरयोर्विरूपयोः संघटनया विषमाऽलङ्कारः श्रौतोपमया सङ्कीर्णः वृत्त्यनुप्रासश्चेति संसृष्टिः । तथा 'हन्त मिश्रीकृतो रसो वर्त्तते" इति गद्यभागे अस्मिन् पद्ये च रसशब्दोपादानात् रसस्य स्वशब्दोक्तिदोषः, तथा गुञ्जनस्य भ्रमरादिशब्द एव ख्यातत्वादत्र धनुष्टङ्कारे च तदुपादानात् ख्यातिविरुद्धतादोषश्च । तेन गद्यांशे 'मिश्रीकृता खल्ववस्था वर्त्तते इति" पाठेन पद्ये च 'गुञ्ज' दित्यत्र 'गर्ज"'दिति पाठेन 'विकचविकरालोल्वणतम" इति पाठेन च तत्समाधानमिति सुधीभिर्विभावनीयम् ।

"करालो दन्तुरे तुङ्गे भीषणे चाभिधेयवत्"दिति मेदिनी । "उल्वणमुद्धतमुद्भटमुत्कटमिति नातिनानार्थो"इति हलायुधः ।

कलहकाम इति "शीलिकामि भिक्ष्याचरिभ्यो णः"इति णप्रत्ययः ।

शिखरिणी वृत्तम् ॥२६॥

(त) चन्द्रेति । सवितुरपत्यं सावित्रः सूर्य्यवंशोत्पन्न इत्यर्थः । सूर्य्यवंशस्य प्राधान्यसूचनार्थं सावित्रपदोपादानम् । नमस्कर्त्तुः प्राधान्यसूचनेन नमस्कार्य्यस्याति-प्राधान्यं सूचितम् स्यादित्यभिप्रायः ।

---

(१) विकटविकरालव्रणमुख इति पाठान्तरम् । (२) अवतरणं रूपयन्निति पाठभेदः ।

सुम। अजितं पुण्यमूर्जस्वि(१) काकुत्स्थस्येव (२) ते महः।
श्रेयसे शाश्वतो देवो वराहः परिकल्पताम् ॥२९॥

अपिच,

देवस्त्वां सविता धिनोतु समरे गोत्रस्य यस्ते पिता,
त्वां मैत्रावरुणोऽपि [३] नन्दतु गुरुर्यस्ते गुरूणामपि।
ऐन्द्रं वैष्णव(४)माग्निमारुतमथो सौपर्णमोजोऽस्तु ते
देयादेव च रामलक्ष्मणधनुर्ज्याघोषमन्त्रो जयम् ॥२८॥

अजितमिति। शाश्वतो नित्यः उत्पत्तिविनाशहीन इति यावत् वराहो धृतवराहमूर्त्तिः देवो विष्णुः ककुत्स्थस्य पुरञ्जयस्येव ते तव अजितं अन्यैरनभिभूतं पुण्यं पवित्रं ऊर्जस्वि प्रबलं महस्तेजः श्रेयसे विजयमङ्गलाय परिकल्पतां सर्वतोभावेन कुरुताम्।

अत्र श्रौत्युपमाऽलङ्कारः।

"शाश्वतस्तु ध्रुवो नित्यम्"। "महस्तूत्सवतेजसो"रिति चामरः।

पुरा किल वृषरूपधारिणो देवराजस्य ककुदि समारुह्य इक्ष्वाकुवंशीयो राजा पुरञ्जयः दानवैः सह समरमारेभे, तेन च तस्य ककुत्स्थ इति नाम बभूव। भगवान् विष्णुस्तत्र युद्धे स्वतेजसा पुरञ्जयशरीरं परिपूर्य यथा तस्मै विजयं दत्तवान्, अधुनापि तथैव तव तेजोविवर्द्धनेन विजयं ददातु इति सेतिहासः सरलार्थः।

• वराहपदोपन्यासात् रघुकुलं वराहमन्त्रोपासकमासीदिति प्रतीयते ॥२९॥

देव इति। सविता सूर्यो देवः समरे अस्मिन् युद्धे त्वां धिनोतु विजयप्रदानेन प्रीणयतु, यः सविता ते तव गोत्रस्य वंशस्य पिता उत्पादक आसीदित्यर्थः। तथा

---

(१) ओजस्वीति पाठान्तरम्। (२) काकुत्स्थस्येवेति पाठभेदः। (३) अभिनन्दतु इति भिन्नः पाठः। (४) ऐन्द्रं वैष्णवमिति क्वचित् पाठः।

लवः। कुमार! अति हि नाम शोभसे रथस्थ एव कृतं कृतमत्यादरेण। [थ]

चन्द्र। तर्हि महाभागोऽप्यन्यं रथमलङ्करोतु। [द]

र्मैत्रावरुणो वसिष्ठोऽपि त्वां नन्दतु विजयदानेन सुखयतु, यो मैत्रावरुणस्तव गुरूणां पितॄणां रामादीनामपि गुरुरुपदेष्टा वर्त्तते इत्यर्थः। वाक्यान्तरारम्भे अथोशब्दः। इन्द्रस्येदम् ऐन्द्रं इन्द्रसम्बन्धीत्यर्थः। एवमन्यत्रापि। विष्णोरिदं वैष्णवं, अग्निमरुतोरिदं आग्निमारुतं 'क्वचिदुभयपदस्यापो"ति उभयत्राकारः, सुपर्णस्य गरुडस्येदं सौपर्णं ओजस्तेजस्ते तव अस्तु भवतु इन्द्रादितेजसा तुल्यं तेजस्तव भवत्वित्यर्थः। रामलक्ष्मणयोर्या धनुर्ज्या मौर्वी तस्या यो घोषः शब्दः तेन युक्तो मन्त्रः ब्रह्मास्त्रप्रयोगमन्त्रश्च तव जयं देयादेव ददात्वेव। ज्याघोषमन्त्र इति "शाकपार्थिवादयश्चे"ति युक्तपदलोपेन मध्यपदलोपी समासः, तेन रामलक्ष्मणयोर्धनुष्टङ्कारः ब्रह्मास्त्रप्रयोगमन्त्रश्च तव जयं ददातु इत्यर्थः।

अत्र अन्यदीयं तेजः कथमन्यस्य भवेदिति वस्तुसम्बन्धोऽसम्भवन् इन्द्रादीनां तेज इव तेजो भवतु इति बिम्बप्रतिबिम्बभावबोधनात् निदर्शनाऽलङ्कारः। पूर्वार्द्धे यच्छब्दयोरुत्तरवाक्यस्थितत्वेन तच्छब्दानपेक्षणात् न विधेयाविमर्शदोषः, किन्तु देयादेव इत्यत्र नियमस्यानावश्यकत्वेऽपि एवशब्दोपादानात् अनियमे नियमाख्यदोषः, स तु 'दद्यादुदात्तानी'त्यादि पाठेन निरसनीयः।

शार्दूलविक्रीडितं वृत्तम् ॥२८॥

(थ) लव इति। रथस्थ एव अतिहि अत्यन्तमेव शोभसे, नास्त इत्यहं सम्भावयामीत्यर्थः। अतएव अत्यादरेण अतिबहुमानेन मां प्रति बहुमानप्रदर्शनार्थं रथादवतरणेनेत्यर्थः: कृतं कृतम् अलमलमिति सम्भ्रमे द्विरुक्तिः।

(द) चन्द्रेति। तर्हि मयि रथस्थे सति, महान् भागो महावीरत्वसूचितं भाग्यं यस्य स महाभागो भवानपीत्यर्थः। अलङ्करोतु आरोहणेन शोभयतु। भवाडग्रामारोहणेन रथ एवालङ्कृतः स्यादिति भावः।

लवः। आर्य्य! प्रत्यारोपय रथोपरि राजपुत्रम्। [ध]

सुम। त्वमप्यनुरुध्यस्व चन्द्रकेतोर्वचनम्। [न]

लवः। को विचारः स्वेषूपकरणेषु, किन्त्वरण्यसदो वयमनभ्यस्तरथचर्य्याः। [प]

सुम। जानासि वत्स! दर्पसौजन्ययोर्यथोचितमीरयितुम्(१) यदि पुनरीदृशं त्वामैक्ष्वाको [२] रामभद्रः पश्येत् तदाऽस्य स्नेहेन हृदयमभिष्यन्देत। [फ]

(ध) लव इति। चन्द्रकेतुकृतमभिवादनमवलोक्य सुमन्त्रस्य पूज्यत्वानुमानात् आर्य्य इति सम्बोधनम्। प्रत्यारोपय आरोहय। राजपुत्रं चन्द्रकेतुम्।

(न) सुमेति। अनुरुध्यस्व अनुसर परिपालयेत्यर्थः। अन्यं रथमारोहेत्यर्थः।

(प) लव इति। स्वेषु स्वकीयेषु उपकरणेषु व्यवहार्य्यद्रव्येषु को विचारो वितर्कः विचिकित्सेति यावत्, अभिन्नहृदयस्य चन्द्रकेतोर्यत् व्यवहार्य्यद्रव्यं निःसंशयं तत् स्वकीयमिव व्यवहर्त्तुमर्हाम्येवेति भावः, किन्तु अरण्यसदो वनवासिनो वयं 'वाऽस्मद' ये'ति बहुवचनं अहमित्यर्थः अतएव न अभ्यस्ता पुनः पुनरारोहणादिना न शिक्षिता रथचर्य्या रथेन सञ्चरणं यैस्तथोक्ताः, अतएव रथारोहणेन योद्धुमशक्तत्वात् भवद्भिरङ्गीक्रियमाणमपि रथं नाङ्गीकरोमीति भावः।

(फ) सुमेति। दर्पसौजन्ययोर्गर्वविनययोः यथोचितं अनुरूपं ईरयितुं वक्तुं जानासि अमसी इत्यर्थः। को विचारः स्वेषु उपकरणेषु इत्यनेन अतीवसौजन्यमाविष्कृतं अथ च परवाक्येन रथं विनापि रथिभिः सार्द्धमहं योद्धुमर्हामीति दर्पो ध्वनित इति भावः। ईदृशं शौर्य्यसौजन्यदर्पादिवीरोचितगुणालङ्कृतम्। अभिष्यन्देत आर्द्रतम् भवेत्। रामभद्रस्यातीवगुणग्राहित्वादिति भावः।

---

(१) आचरितुमिति पाठान्तरम्। (२) ऐक्ष्वाको राजा रामभद्र इति पाठभेदः।

लवः । आर्य्य ! [१] सुजनः स राजर्षिः श्रूयते । सलज्जमिव । [ब]

वयमपि न खल्वेवंप्रायाः क्रतुप्रविघातिनः [२]
क इह च [३] गुणैस्तं राजानं नवा बहु मन्यते ।
तदपि खलु मे स व्याहारस्तुरङ्गमरक्षिणां
विकृतिमखिलक्षत्राक्षेपप्रचण्डतयाऽकरोत् ॥२८॥

(ब) लव इति । आर्य्येति सुमन्त्रस्य सम्बोधनम् । राजा सन् ऋषिः ऋषिवत् संयमीति राजर्षिः स रामचन्द्रः सुजनः दयादाक्षिण्यशौर्य्यधैर्य्यादिसकलवीरगुणालङ्कृतः सुजन इत्यर्थः श्रूयते लोकपरम्परया रामायणसन्दर्भेण चेति शेषः । सलज्जमिव एवं सर्वगुणाकरस्यापि रामस्य अश्वावरोधेन अश्वमेधविघ्नाचरणात् लज्जया सहितमिव ।

ननु यदि रामभद्रः सुजन इति श्रूयते तदा तस्य यज्ञविघ्नचरणं तवातीवान्याय्यमित्याह वयमिति 'अस्मदश्च'ेति बहुवचनम् अहमपीत्यर्थः प्रायेण बाहुल्येन एवमिति एवंप्राया एवंविधाः क्रतुं यागं प्रविघ्नन्तीति क्रतुप्रविघातिनः राक्षसादिवत् स्वभावत एव यज्ञविघ्नकरा न खलु भवाम इत्यर्थः । तर्हि किं रामं दुर्जनं मत्वा तं प्रति विद्वेषात् मिथ्याश्वो गृहीत इत्याह क इति । किञ्चेति चार्थः । इह जगति कोजनः गुणैः दयादाक्षिण्यशौर्य्यादिभिः तं राजानं रामं नवा बहु मन्यते आद्रियते अपितु सर्व एव तं बहुमन्यत इत्यर्थः; सुतरामहमपि तं बहुमन्य एवेति भावः । ननु तर्हि कथं मिथ्याश्वो धृत इत्याह तदपीति । तदपि तथापि तुरङ्गमरक्षिणां अश्वमेधीयाश्वरक्षिणां स व्याहारः खलु 'अयमश्वः पताकेव" इत्याद्युक्तिरेव अखिलानां सर्वेषां क्षत्राणां क्षत्रियाणां आक्षेपेण अवमाननया या प्रचण्डता नितान्तकटुता तया मे मम विकृतिं मनोविकारं अश्वधारणप्रवृत्तिमित्यर्थः अकरोत् उत्पादितवान् । सर्वेषां क्षत्रियाणामवमाननाविधानादेव अश्वो धृतः, नतु जयलिप्सया नवा सहजदुर्जनतयेति भावः ।

---

(१) मान्य इति पाठान्तरम् । (२) क्रतुप्रतिघातिन इति पाठभेदः । (३) क इव च इति भिन्नः पाठः ।

चन्द्र । सस्मितम् । किन्तु, भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः ?(भ)

लवः । अस्त्विहामर्षो(१)मा भूद्वा, एतत्तु पृच्छामि, दान्तं हि राघवं राजानं शृणुमः, स किल नात्मना दृप्यति, नाप्यस्य

अत्र द्वितीयचरणे अप्रस्तुतात् जनसामान्यात् प्रस्तुतस्य विशेषस्य लवस्य प्रतीतेरप्रस्तुतप्रशंसाऽलङ्कारः स च अर्थापत्त्युत्थापितः इति सङ्करः । तदपीति तथापीत्यर्थे अवाचकमित्यवाचकत्वदोष इति वदन्ति ।

"चण्डस्त्वत्यन्तकोपन" इत्यमरः ।

हरिणी वृत्तम् ॥२८॥

(भ) चन्द्रेति । तातस्य पितृपर्य्यायस्य रामचन्द्रस्य प्रतापोत्कर्षेऽपि प्रभावातिशयेऽपि अमर्षः असहिष्णुता वर्त्तत इति शेषः । यस्य कस्यचित् साधारणस्य प्रतापोत्कर्षे भवादृशमहावीरस्य अमर्षः सम्भाव्यत एव किन्तु जगत्स्वीकृते तातप्रतापोत्कर्षे तवामर्षः अज्ञानविजृम्भित एवेति भावः ।

(स) लव इति । इह रामप्रतापोत्कर्षे अमर्षः क्रोधेन मम असहिष्णुता अस्तु मा भूद्वा भवतु न भवतु वा, तत्र मम किमपि न प्रष्टव्यमस्तीति भावः । तु किन्तु, एतत् वक्ष्यमाणं पृच्छामि भवन्तमिति शेषः । राघवं राजानं रामचन्द्रं दान्तं हि दान्तमिव इन्द्रियदमनशीलमेव अनुद्धतवादिनमेवेत्यर्थः शृणुमः लोकपरम्परया रामायणसन्दर्भे चेति शेषः । किलेति वार्त्तायां । स रामचन्द्रः आत्मना स्वयं स्वसुखेनेत्यर्थः न दृप्यति न दर्पं करोति । अस्य रामस्य प्रजासु प्रकृतिषु दृप्तत्वं गर्वितत्वं नापि नवा जायते जनव्यवहाराणां प्रधानानुयायित्वादिति भावः । तत् तस्मात् रामस्य तत्प्रजानाञ्च अनुद्धतत्वाद्धेतोरित्यर्थः अस्य रामस्य मनुष्याः अधिकृतसैनिकाः राक्षसीं राक्षसनत् दर्पोद्धतां । दान्तस्य प्रभोरधिकृतपुरुषाणां दान्तत्वमेवोचितमिति भावः ।

आत्मनेति प्रकृत्यादित्वात् करणे तृतीया ।

---

(१) क्वचित् इहशब्दो नास्ति ।

प्रजासु दृप्तत्वं जायते, (१) तत् किमस्य मनुष्या राक्षसीं वाचं वदन्ति। [त्र]

ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः।
सा योनिः सर्ववैराणां सा हि लोकस्य निर्ऋतिः॥३०॥

इति हस्म तां निन्दन्ति, अथेतरामभिष्टुवन्ति। [य]

ननु लोकाः सैनिका राक्षसीं वाचं वदन्ति तेन तव किमायाति यातीत्याह ऋषय इति। ऋषयो वस्तुस्वभावाभिज्ञा मुनयः उन्मत्त उन्मादरोगग्रस्तः दृप्तः वीरत्वेन धनादिना वा गर्वितः तयोः वाचं गर्वोद्धतं वाक्यमित्यर्थः राक्षसीं राक्षसोचितां निष्ठुरां आहुर्वदन्ति। ननु वदन्ति, वदन्तु नाम तेन किमित्याह सेति। सा राक्षसी वाक् सर्ववैराणां सर्वविधानां शत्रुतानां योनिः कारणं, तथा सा हि सैव वाक् लोकस्य जनस्य निर्ऋतिः निर्भवति ऋतिः शुभं यस्याः सकाशात् सा निर्ऋतिः अलक्ष्मीः अलक्ष्मीरूपेत्यर्थः। तथा च लोका दर्पोद्धतां वाचमाकर्ण्यैव शत्रुतामारभन्ते, तेन च अलक्ष्मीर्दर्पोद्धतवादिनः स्कन्धमारुह्य सर्वविधममङ्गलं घटयतीति भावः।

अत्र 'सुखं तव कुरङ्गाक्षि! सरोजमिति नान्यथा" इत्यादिवत् सा वाक् निर्ऋतिरिति समासाभावेऽपि निरङ्गं केवलरूपकमलङ्कारः। सा योनिः सर्ववैराणामित्यनेन युष्मत् सैनिकानां दर्पोद्धतां वाचमाकर्ण्यैव मैथ्याधमहं युद्धवानस्मीति वस्तु व्यज्यत इति वस्तुना वस्तुध्वनिः।

ऋतिर्गतौ घृणायाञ्च स्पर्धायाञ्च शुभेऽपि चे"ति रभसः। 'स्यादलक्ष्मीस्तु निर्ऋति-रित्यमरः।

निर्ऋतिरिति नैरिकारस्य संयोगपूर्ववत् हठोच्चारणात् न छन्दोभङ्ग इति दिक्॥३०

(य) इतीति। इतिहेति उपदेशपरम्परासूचकमव्ययम्। स्मेति अतीतार्थे स्मशब्दः। तां दर्पोक्तिं निन्दन्ति स्म। अथेति वाक्यान्तरारम्भे इतरां तद्भिन्नां विनयशालि-

---

(१) नास्य प्रजा ईदृशो जायन्त इति पाठान्तरम्।

कामान् दुग्धे, विप्रकर्षत्यलक्ष्मीं
कीर्त्तिं सूते, दुष्कृतं या हिनस्ति ।
ताञ्चाप्येतां मातरं मङ्गलानां
धेनुं धीराः सूनृतां वाचमाहुः ॥२१॥

मित्यर्थः वाचं अभिष्टुवन्ति स्म प्रशशंसुः मुनय इति शेषः । मुनयो दर्पोक्तिं निनिन्दुः विनयशान्तोक्तिञ्च प्रशशंसुरित्यस्माकं परम्परोपदेश इति सरलार्थः ।

"पारम्पर्योपदेशे स्यादैतिह्यमितिहाव्यय" मित्यमरः ।

प्रशंसाप्रकारमाह कामानिति । या सूनृता वाक्, कामान् मनोरथान् दुग्धे परिपूरयति, येन हि सूनृतभाषा सन्तुष्यन्तः श्रोतारो वक्तुरभिलाषान् पूरयितुं यतन्त इति भावः । अलक्ष्मीं अशुभाधिष्ठात्रीं देवीं विप्रकर्षति दूरीकरोति सकलकल्याणनिदानत्वादिति भावः । कीर्त्तिं यशः सूते समुत्पादयति, येन च तादृशं वाचं शृण्वन्तः सम्मोदमाना जना लोकेषु 'एष खल्वतीवसुवक्ते'ति नाम प्रथयन्तीति भावः । दुष्कृतं सञ्चितपापं हिनस्ति विनाशयति च, श्रोतृविशेषाणां प्रीतिसम्पादने तेषामाशीर्वादादिना तत्पुण्यजननादिति भावः । धीराः पण्डिताः, एतां मया निर्द्दिश्यमानां तां मङ्गलानां निखिलकुशलानां मातरं जनयित्रीं सूनृतां सत्यप्रियां वाचं धेनुं कामधेनुतुल्याञ्चापि आहुः वदन्ति मुनय इति शेषः । कामधेनुरिव सूनृता वाक्, सकलकामनापूरयित्रीत्यर्थः ।

अत्र प्रथमार्द्धे दुग्ध इत्याद्यनेकक्रियाणां या इत्येककर्त्तृकारकत्वात् दीपकमलङ्कारः द्वितीयार्द्धे धेनुशब्दस्य धेनुसादृश्यार्थे पर्यवसानात् असम्भवद्वस्तुसम्बन्धा निदर्शना, अनयोः संसृष्टिः । अपिचशब्देन 'कवय उन्मत्तदृप्तयोर्वाचं राक्षसीमाहुः, एताञ्चापि धेनुमाहु'रिति समुच्चयार्थद्योतनात् न अपुष्टार्थत्वदोषः

'सुना' मिति । सर्वे" [illegible] ।

३

सुम । परिपूतस्वभावोऽयं कुमारः प्राचेतसान्तेवासी वदत्यभिसम्पन्नमार्षेण संस्कारेण । [र] [१]

लवः । यत् पुनश्चन्द्रकेतो ! वदसि, किन्नु भवतस्तातप्रतापोत्कर्षेऽप्यमर्ष इति, तत् पृच्छामि, किं व्यवस्थितविषयाः क्षत्रधर्म्मा इति । [ल]

(र) सुमेति । प्राचेतसस्य वाल्मीकेः अन्तेवासी छात्रः, अतएव परिपूतस्वभावः पवित्रचरित्रः अयं कुमारो बालकः आर्षेण ऋषितुल्येन संस्कारेण अनुभवेन अभिसम्पन्नं संयुक्तं सर्वं ऋमुनितुल्यानुभवप्रयुक्तमित्यर्थः वचनमिति शेषः वदति । येन हि तादृशी युक्तिपरम्परा अस्य वचने प्रतिभाति, सुतरामसाधारणोऽयं बालक इति भावः ।

'संस्कारः । ······अनुभव" इति शब्दकल्पद्रुमः ।

(ल) लव इति । चन्द्रकेतुसैनिकानां शिक्षैवेदृशी, यत् सर्वेव इमामेव वाचं वदेदिति ; तेन च परैर्वैरं स्यादिति चेदुच्यते तत्, त्वया आरब्धमेव इत्याशङ्क्य 'किन्नु भवत इत्यादि चन्द्रकेतोर्वाक्यमेव खण्डयितुमुपक्रमते यत् पुनरित्यादि । पुनः किन्तु, हे चन्द्रकेतो ! इति इत्यन्तं यत् त्वं वदसि, तत् पृच्छामि तव जिज्ञासे इत्यर्थः । क्षत्रधर्म्माः प्रतापशौर्य्यादयः क्षत्रियस्वभावाः किं व्यवस्थितः विधिना निर्द्दिष्टः विषय आश्रयपदार्थो येषां ते तथोक्ताः । सर्वातिशायी प्रतापः लोकोत्तरञ्च शौर्य्यं किं रामचन्द्र एव विधिना निर्दिष्टम् अपितु कयमपि नेत्यर्थः । प्रतापशौर्य्यादीनामदृष्टविशेषापेक्षतया रामादन्योऽपि अदृष्टविशेषवान् प्रतापशौर्य्यादिमन्तो भवितुमर्हन्तीति भावः । अहमपि महाप्रतापशाली महावीरश्चेति ध्वनिः । इतिशब्दस्य पृच्छामीत्यनेनान्वयः ।

---

(१) परिपूतेत्यत्र 'अपरिप्लुत' इति पाठान्तरम् । वदतीत्यतः परं 'अयं' इत्यधिकः पाठः क्वापि ।

सुम। नैव खलु जानासि तं देवमैक्ष्वाकं, यदेवं वदसि; [१] तद्विरम विरमातिप्रसङ्गात्। [ब] [२]

सैनिकानां प्रमाथेन सत्यमोजायितं त्वया।
जामदग्न्यस्य दमने[३] नैवं निर्वक्तु[४] मर्हसि ॥३२॥

(ब) सुमेति। वाक्यालङ्कारे खलुशब्दः। ऐक्ष्वाकं इक्ष्वाकुकुलोत्पन्नं तं देवं रामचन्द्रं नैव जानासि लोकोत्तरवीरत्वेन नैव परिचिनोषि, यत् यस्मादपरिचयाद्धेतोः एवं सदर्पं वदसि। यदि रामस्य यथार्थपरिचयस्तवासीत् तदा नैवं वक्तुं शक्नुयाः इति भावः। तत् तस्मात् अज्ञानविजृम्भितत्वाद्धेतोः अतिप्रसङ्गात् सम्भवातिरिक्तादौद्धत्यादित्यर्थः विरम विरमेत्यवधारणार्थे द्विरुक्तिः।

सैनिकानामिति। त्वया सैनिकानां अस्मत्सैन्यानां प्रमाथेन विमर्द्दनेन पराजयेनेति यावत् सत्यं यथार्थमेव ओजायितं ओजस्विवदाचरितं महावीरेणेव विक्रान्तमित्यर्थः। बालकस्त्वमेकाकी सर्वानस्मत्सैन्यान् यत् पराजितवान् तदेव तव महाविक्रमनिदर्शनं तवास्माकं प्रतिवादो नास्तीति भावः। किन्तु जामदग्न्यस्य एकविंशतिवारं सर्वक्षत्रान्तकारित्वेन सुप्रसिद्धमहावीरस्य जमदग्निपुत्रस्य परशुरामस्य दमने विजितरि रामे रामविषये इत्यर्थः एवम् इत्थं, रामसदृशा अपरेऽपि सन्ति वीरा इतिभावाभिव्यञ्जकं वाक्यमित्यर्थः निर्वक्तुं निश्चयेन भाषितुं नार्हसि। तथात्वे तव महती विपदापतेदिति भावः।

अत्र काकु प्रत्ययप्रतिपादितोपमाऽलङ्कारः।

ओजस्वीवाचरितमित्योजायितं क्यङि "ओजसोऽप्सरसो नित्यम्" इति सलोपः।

---

(१) यदेवं वदसीति पाठो नास्ति क्वचित्। (२) विरम्यतामतिप्रसङ्गादिति पाठान्तरम्। (३) रामेऽप्यसह्यमानेन इति पाठभेदः। (४) नातिनिर्वक्तुं नहि निर्वक्तुमिति विभिन्नौ पाठौ।

लवः। (सहासम्।) जामदग्न्यस्यापि [१] दमनः स राजेति कोऽयमुच्चैर्वादः। [अ]

सिद्धं ह्येतद्वाचि वीर्यं द्विजानां
बाह्वोर्वीर्यं यत्तु तत् क्षत्रियाणाम्।
शस्त्रग्राही ब्राह्मणो जामदग्न्य-
स्तस्मिन् दान्ते का स्तुतिस्तस्य राज्ञः? ॥३३॥

"ओजःशब्दो वृत्तिविषये तद्वतो"ति दीक्षितः। दमयतीति दमनः नन्द्यादित्वात् ल्युः ॥३२॥

(अ) लव इति। हासेन अयुक्तवाक्यश्रवणादुपहासेन सह वर्त्तमानमिति सहासम्। स राजा रामः। दमनो विजेता। इत्ययं क उच्चैर्वादः का नाम महती प्रशंसा अपितु कापि नेत्यर्थः।

अत्र कारणमुपन्यस्यति सिद्धमिति। एतत् हि एतदेव सिद्धं प्रसिद्धं यत् द्विजानां ब्राह्मणानां वीर्यं बलं वाचि वाक्य एव वर्त्तत इति शेषः। ब्राह्मणास्तपसा दुर्बलदेहाः सिद्धवाचश्च सन्तः शापेन दमयितुमर्हन्ति नतु बाहुबलेन ते महावीरा इति भावः। तु किन्तु बाह्वोर्भुजयोः यत् वीर्यं तत् क्षत्रियाणां नतु ब्राह्मणानामिति भावः। स ब्राह्मणो जामदग्न्यः शस्त्रग्राही दुर्बलबाहुना अस्त्रधारी, अतएव तस्मिन् दुर्बलबाहुना शस्त्रचालना-समर्थे ब्राह्मणे दान्ते विजिते सति तस्य राज्ञो विजयिनो रामस्य का स्तुतिः प्रशंसा, अपितु कापि नेत्यर्थः। रामश्चेत् कश्चिदन्यं महाबाहुं क्षत्रियं विजेतुमशक्ष्यत् तदैव भवत्कृतप्रशंसायोग्योऽभविष्यदिति भावः।

अत्र बाह्वोर्वीर्यं क्षत्रियाणामित्यनेन 'नतु ब्राह्मणाना'मित्यर्थान्तरव्यपोहात् आर्थी परिसंख्याऽलङ्कारः।

शालिनी वृत्तम् ॥३३॥

---

(१) कस्मिंश्चित् पुस्तके अपिशब्दो नास्ति।

चन्द्र। सोन्मायमिव। आर्य्ये! आर्य्ये! कृतमुत्तरोत्तरेण। [ष]
कोऽप्येष सम्प्रति नवः पुरुषावतारो
वीरो [१] न यस्य भगवान् भृगुनन्दनोऽपि।

(ष) चन्द्रेति। उन्माथेन मर्म्मवेदनया सह वर्त्तमानमिति सोन्माथम्। आर्य्ये आर्य्येति क्रोधे द्विरुक्तिः। उत्तरं परं यदुत्तरं प्रतिवाक्यं तेन कृतम् अलं अतः परमस्य प्रतिवचनं न देयमित्यर्थः। सर्वविदितवृत्तान्तानभिज्ञेन केवल-साहङ्कारोक्तिकारिणा अनेन बालकेन सह उक्तिप्रत्युक्तिकरणे स्वस्यैव लाघवं स्यादिति भावः।

केवलसाहङ्कारोक्तिकारित्वं सर्वविदितवृत्तान्तानभिज्ञत्वञ्च लवस्य प्रतिपादयति कोऽपीति। सम्प्रति कोऽपि अनिर्वचनीयः पदार्थः, नवः अपूर्वः एषः पुरुषावतारः नरः सन् अवतीर्णः। सोल्लुण्ठनोक्तिरियम्। तत्कारणमाह वीर इति। यस्य समीपे भगवान् महामाहात्म्यशाली भृगुनन्दनोऽपि परशुरामोऽपि न वीरः, यः त्रिःसप्तकृत्वो जगतीपतीनां हन्तारं जगत्स्वीकृतं महावीरं परशुराममपि वीरत्वेन न गणयतीत्यर्थः। योऽहि वाचा तं भावं व्यनक्ति ततोऽधिकोऽहङ्कारी को नाम भवितुमर्हति, सुतरां महादाम्भिकोऽयम-र्भय एवेति भावः। यत्र पर्य्याप्ता यथेप्सिता सप्तभुवनस्य भूरादिसप्तलोकस्य अभयद-क्षिणा सर्वशत्रुबलवाहनस्य रावणस्य वधेन अभयदानं येषु तानि तथोक्तानि, पुण्यानि पवित्राणि तातस्य पितृपर्य्यायस्य रामस्य चरितानि कर्म्माणि न वेद जानाति। सुतरां सर्वविदितवृत्तान्तानभिज्ञोऽप्ययमिति भावः।

अत्र लवस्य महादाम्भिकत्वं अनभिज्ञत्वञ्च प्रतीयमानं भङ्गिविशेषेणाभिहितमिति पर्य्यायोक्तमलङ्कारः, तथा 'भग भृगु" इति 'पर्य्याप्तसप्ते"ति व्यञ्जनानामनेकधासकृत-साम्यात् छेकानुप्रासश्च, इत्यनयोः संसृष्टिः। यस्येति यच्छब्दस्य उत्तरवाक्यस्थत्वेन तच्छब्दानपेक्षणात् न विधेयाविमर्शदोषः।

---

(१) श्लाघ्य इति पाठान्तरम्।

पर्य्याप्तसप्तभुवनाभयदक्षिणानि
पुण्यानि तातचरितानि च यो न वेद ॥३४॥

लवः। को हि रघुपतेश्चरितं महिमानञ्च न जानाति, यदि नाम किञ्चिद्वक्तव्यमस्ति, अथवा शान्तम्। [स]

वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु, किं वर्ण्यते
सुन्दस्त्रीदमनेऽप्यखण्डयशसो [१] लोके महान्तो हि ते।

"कामं प्रकामं पर्य्याप्तं निकामेष्टं यथेप्सित"मित्यमरः।

अवतार इति 'दिहिलिहि'त्यादौ चकारात् णप्रत्ययः कर्त्तरि, ततस्तेन कर्म्मधारयः सप्तानां भुवनानां समाहार इति सप्तभुवनं भुवनशब्दस्य पात्रादित्वात् न ईप्रत्ययः। दानार्थे दक्षिणाशब्दो लाक्षणिकः।

वसन्ततिलका वृत्तम् ॥३४॥

(स) लव इति। वक्तव्यं आलोचनीदम्। शान्तं विरतं भवतु तदालोचनमित्यर्थः।

ननु कथं शान्तम्, आलोच्यतामेव रामचरितमित्याह वृद्धा इति। वृद्धा वयोवृद्धास्ते रामा गौरवाद्बहुवचनम्, अतएव विचारणीयानि समालोचनीयानि चरितानि कर्म्माणि येषां ते, न भवन्तीत्यर्थः, अथवा किं वर्ण्यते किं वर्णनीयमस्ति, रामस्य वीरचरितवर्णनारम्भे दोषाविष्कार एव स्यादिति भावः। तदेव दर्शयति सुन्देत्यादि। सुन्दस्य सुन्दनामकस्य असुरस्य स्त्री भार्य्या ताड़का, तस्या दमने वधे कृते सतीत्यर्थः अखण्डं परिपूर्णं यशो येषां ते अखण्डयशसः रामाः गौरवाद्बहुवचनं लोके जगति, महान्तो हि महात्मान एव पूज्या एवेत्यर्थः। स्त्रीहत्यारूपं लोकशास्त्रगर्हितं कार्य्यं सम्पादितवतोऽपि रामस्य यशो न कलुषितं, किन्तु जगति जनैः स परिपूज्यते इति सोल्लुण्ठनोक्तिः। खरस्य तदाख्यस्य महावीरराक्षसस्य आयोधने युद्धे यानि त्रीण्यपि चौणि अपराद्धुखानि

---

(१) अकुण्ठयशस इति पाठभेद.।

यानि त्रीण्यपराङ्मुखान्यपि (१) पदान्यासन् खरायोधने
यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः ॥ ३५ ॥

अविमुखानि अदर्शितपृष्ठानीत्यर्थः यावत् पदानि पश्चाद्दिशि पदक्षेपा आसन् अभवन्, तथा यद्वा यच्च इन्द्रसूनोर्देवराजतनयस्य वालिनो निधने विनाशे कौशलं नैपुण्यं रामस्य आसीदिति शेषः, तत्रापि तेष्वपि रामस्य चरितेषु जनो लोकोऽभिज्ञः ज्ञानवान्। न केवलं रावणादिनिधनादिना चमत्कारीणि रामचरितानि जनो जानाति, अपितु स्त्रीहत्या, खरसमरे पलायनकल्पमपसरणं, सुग्रीवेण सार्द्धं युद्धव्यापृतस्य वालिनो विनाशश्च एतानि पापविशेषकलुषितान्यपि रामचरितानि जनो जानात्येवेति अभिसन्धार्थः। स्त्रीहत्यादपवीभत्सकर्म्माचरणात् रामस्य च तसोऽनौदार्य्यं खरसमरे पश्चादपसरणात् भीरुताप्रकाशः छलेन वालिनो निधनं भीतिद्योतकं नितान्तकन्या-र्य्यमिति रामचरित्रदोषा इति भावः।

अत्र विवक्षितस्य रामदोषस्य तिष्ठन्त्वित्यनेन निषेधाभासात् वक्ष्यमाणगत आक्षेपा-लङ्कारः पदार्थहेतुकेन काव्यलिङ्गेन सङ्कीर्य्यते।

तत् तिष्ठतु इति बहुवचनान्तात् वप्रत्ययः।

स्त्रीहत्यायां पापमाह याज्ञवल्क्यवचनं लिखितस्वधृतवचनञ्च---

"शरणागतबालस्त्री-हिंसकान् संवसेन्न तु।
चीर्णव्रतानपि सदा कृतघ्नसहितानिमान्॥"
"अवध्याश्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतेष्वपि।"

खरयुद्धे रामस्य विपदापसर्पणप्रमाणं यथा रामायणे---

"विकलः स कृतो बाणैः खरो रामेण संयुगे।
मत्तो रुधिरगन्धेन तमेवाभ्यद्रवद्द्रुतम्।

---

(१) अकुतोभयान्यपीति पाठान्तरम्।

चन्द्र । आः, तातापवादभिन्नमर्य्याद ! अति हि नाम प्रगल्भसे । (छ)

रामापतन्तं संक्रुद्धं ज्ञात्वासौ रुधिराप्लुतं ।

अपासर्पद्धि विपदं किञ्चित्त्वरितविक्रमः । ”

“बाणक्षेपावकाशो यथा न भवति तथोपर्य्यापतन्तं खरं दृष्ट्वा अत्यासत्ती धनुर्व्यापारो न स्यादिति स्वशरीरे तद्रुधिरपातभिया च द्वित्राणि पदानि त्वरितपदन्यासो बाणं सन्दधदेव प्रहृतोऽपासर्पं” दिति रामानुजः । लवस्तु ‘आत्मरक्षार्थमेव द्वित्रिपदापसर्पण’ मिति उक्तरामायणवचनार्थमवधार्य्य तदेव पलायनमिव मन्यमानः कटाक्षितवानित्यवधेयम् । तत्र युद्धे क्षत्रियाणां पलायनं मनुना निषिद्धं —यथा—

“समोत्तमाधमै राजा त्वाहूतः पालयन् प्रजाः ।

न निवर्त्तेत संग्रामात् क्षात्रं धर्म्ममनुस्मरन् ॥ ”

सुग्रीवेण सह युध्यमानो वाली प्रच्छन्नवर्त्तिना रामेण निहतः । तदुक्तं रामायणे—

“ हीयमानमथापश्यत् सुग्रीवं वानरेश्वरम् ।

प्रेक्षमाणं दिशश्चैव राघवः स मुहुर्मुहुः ॥

ततो रामो महातेजा आर्त्तं दृष्ट्वा हरीश्वरम् ।

स शरं वीक्षते वीरो वालिनो वधकाङ्क्षया ॥ ”

* * *

“मुक्तस्तु वज्रनिर्घोषः प्रदीप्ताशनिसन्निभः ।

राघवेण महाबाणो वालिवक्षसि पातितः ॥ ”

इदृशवधोऽपि मनुना निषिद्धः । तथाच हन्यादित्यधिकारे मनुः—

“नायुध्यमानं पश्यन्तं न परेण समागतम् । ”

शार्दूलविक्रीडितं वृत्तम् ॥ ३५ ॥

(छ०) चन्द्रेति । आ इति क्रोधसूचकमव्ययम् । तातस्य पितृपर्य्यायस्य रामस्य अपवादेन निन्दया भिन्ना क्षुण्णा नष्टेति यावत् मर्य्यादा न्याय्यपथस्थितिर्यस्य तत्सम्बोधनम् । विनयादनतभाविनःवस्थानयोग्यस्य सामान्यबालकस्य लवस्य जगत्स्वेक्तमहावीरराम-

लवः। अये! मय्येव (१) भ्रुकुटीधरः संवृत्तः। (च)

सुम। स्फुरितमनयोः क्रोधेन। तथाहि [क]

चूड़ामण्डलबन्धनं तरलयत्याकूतजो वेपथुः [२]
किञ्चित्कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः।

निन्दया न्याय्यपथातिक्रमणमेव जातमिति भावः। अति हि अत्यन्तमेव प्राज्ञे विकत्थसे रामनिन्दया दम्भं प्रकटयसीत्यर्थः। नामेत्यपि क्रोधसूचकम्। अतएव तवं तद्दर्पशातनं मयाऽवश्यमेव विधेयमिति भावः।

"मर्य्यादा। न्याय्यपथस्थिति" रिति शब्दकल्पद्रुमः।

(च) लव इति। अये इति सावज्ञसम्बोधने। मय्येव प्रत्यक्षगोचरयुष्मत्-सर्वसैन्यविमर्द्दनकारिणि महावीर एवेत्यर्थः भ्रुकुटीधरः क्रोधेन भ्रूभङ्गकारी संवृत्तो जातः। अतएव तवाप्यस्याः साहसिकतायाः समुचितशास्तिविधानं मया कर्त्तव्यमिति भावः।

(क) सुमेति। अनयोः कुमारयोः क्रोधेन स्फुरितम् आविर्भूतं, स्फुरितमिति भावे क्तः। क्रोधः प्रकाशित इत्यर्थः। क्रोधप्रकाशं प्रतिपादयति तथाहीति।

चूड़ेति। आकूतजः परस्परप्रहाराभिप्रायजनितः कोपोत्पन्न इत्यर्थः वेपथुः कम्पः चूड़ामण्डलस्य केशपाशसमूहस्य बन्धनं संयमनं यत्र शिखासमूहमित्यर्थः तरलयति कम्पयति, तथा स्वयं आत्मना स्वभावत एवेत्यर्थः कोकनदच्छदस्य रक्तपद्मपत्रस्य किञ्चित्सदृशे ईषत्समाने रक्तोत्पलतुल्यस्वाभाविककिञ्चिल्लोहित[illegible] इत्यर्थः नेत्रे चक्षुषी रज्यतः क्रोधेन रक्तागमादधिकलोहितवर्णे भवतः। तथा यत्र मुखं कर्त्तृ अकाण्डे अनवसरे सहसेत्यर्थः ताण्डवितयोः नृत्यतोः कम्पमानयोरित्यर्थः भ्रुवोः भ्रूद्वयस्य भङ्गेन पृथग्भावेन भीषणभ्रुकुटया इत्यर्थः, उत्कटं सुस्पष्टं लाञ्छनं

---

(१) आः कथं मय्येवेति पाठान्तरम्। (२) क्रोधेनोद्धतधूतकुन्तलभरः सर्वाङ्गजो वेपथुरिति पाठभेदः।

धत्ते कान्तिमकाण्डताण्डवितयोर्भङ्गेन वक्रं भ्रुवो-
श्चन्द्रस्योत्कटलाञ्छनस्य [१] कमलस्योद्भ्रान्तभृङ्गस्य च ॥३६॥

कुमारौ । तदितो विमर्दक्षमां भूमिमवतरावः । [ख]

इति निष्क्रान्ताः सर्वे ।

—:०:—

यस्य तादृशस्य चन्द्रस्य, तथा उद्भ्रान्ता उपरि भ्रमन्तः भृङ्गा भ्रमरा यस्य तस्य उद्भ्रान्तभृङ्गस्य कमलस्य पद्मस्य च कान्तिं शोभां धत्ते वहति। अनयोर्वदनद्वयं चन्द्रपद्माभ्यां सदृशं नयनताराचतुष्टयञ्च चन्द्रकलङ्कभ्रमरैस्तुल्यमित्यर्थः। एभिर्लिङ्गैरनयोः कोपोऽनुमीयते, तेन च इदानीमेव समरारम्भोभवेदित्यवगम्यत इति भावः।

अत्र अन्यस्य कान्तिं कथमन्यो धत्त इति वस्तुसम्बन्धोऽसम्भवन् तत्सदृशकान्तिमिति बिम्बप्रतिबिम्बभावं बोधयतीति निदर्शनाऽलङ्कारः, तथा तत्कृतविच्छित्तिवशात् कम्परक्तनेत्रताभ्रूभङ्गरूपैर्हेतुभिः कोपरूपसाध्यस्य ज्ञानादनुमानालङ्कारश्च, अनयोरङ्गाङ्गिभावेन सङ्करः, काण्डताण्डेति व्यञ्जनानां सकृदनेकधासाम्याच्छेकानुप्रासश्चेति संसृष्टिः।

"आकूतं स्यादभिप्राय इति हलायुधः। "शिखा चूडा केशपाशी जूटिका जुटिकेत्यपि। शिरोमध्यबद्धचूडे" इति शब्दरत्नावली।

तरलयतीति तरलं करोतीति इन्। ताण्डवमनयोर्जातमिति इतच्।

शार्दूलविक्रीडितं वृत्तम् ॥ ३६ ॥

(ख) कुमाराविति। तत्स्मात् तातापवादिनः तर्जयितुश्च तव शास्तिविधानस्यावश्यकत्वादित्यर्थः। इतः स्थानात्, विमर्दक्षमां युद्धोपयोगिनीं भूमिं अवतरावो ऽवतराव:।

(१) उद्भटलाञ्छनस्येति पाठान्तरम्।

इति कुमारविक्रमो नाम पञ्चमोऽङ्कः। (ग)

(ग) इतीति। कुमारयोः लवचन्द्रकेत्वोर्विक्रमो यत्र सः, पञ्चमोऽङ्कः समाप्त इति शेषः।

इति श्रीहरिदाससिद्धान्तवागीशविरचितायामुत्तररामचरितटीकायां सर्वार्थबोधिनीसमाख्यायां पञ्चमाङ्कविवरणं समाप्तम् ॥ ० ॥



अथ षष्ठोऽङ्कः।

—):०:(—

ततः प्रविशति विमानेनोज्ज्वलेन (१) विद्याधरमिथुनम्। [क]

विद्याधरः। अहो खल्वनयोर्विकर्त्तनकुलकुमारयोरकाण्ड-कलहप्रचण्डयोरुद्द्योतितचापलक्ष्मीकयो[२]रत्युद्भ्रान्तदेवासुराणि विक्रान्तचरितानि। तथाहि प्रिये! पश्य पश्य। [ख]

(क) तत इति। विद्याधरः कामरूपी खेचरः देवयोनिविशेषः। विद्याधरी च विद्याधरश्चेति विद्याधरौ, तयोर्मिथुनं युग्मं विद्याधरदम्पती इत्यर्थः। उज्ज्वलेन उपकरणोत्कर्षात् दीप्यमानेन, विमानेन व्योमयानेन।

(ख) विद्याधर इति। अहो आश्चर्यं, खलु वाक्यालङ्कारे। अकाण्डे अनवसरे यः कलहः समरः तेन प्रचण्डयोरुग्रयोः, तथा उद्द्योतिता प्रकाशिता चापे लक्ष्मीः वीरत्वव्यञ्जिका श्रीः ययोः तयोः, अनयोर्दृश्यमानयोः, विकर्त्तनकुलकुमारयोः सूर्यवंशीयबालकयोः, चन्द्रकेतुलवयोः अत्युतेन विस्मयेन उद्भ्रान्ता अस्थिरान्तःकरणाः तारतम्यकरणासमर्था इत्यर्थः देवासुराः देवदानवा यैस्तानि, विक्रान्तचरितानि विक्रम-

---

(१) विमानोज्ज्वलमिति पाठान्तरम्। (२) उद्योतितचापलक्ष्मीकाणि इति पाठभेदः।

झणज्झणितकङ्कणक्कणितकिङ्किणीकं धनु-
र्ध्वनद्गुरुगुणाटनीकृतकरालकोलाहलम्।
वितत्य किरतोः शरानविरतस्फुरच्चूडयो-
र्विचित्रमभिवर्द्धते भुवनभीममायोधनम्॥ १॥
विजृम्भितञ्च दिव्यास्त्रं [१] मङ्गलाय द्वयोरपि।
स्तनयित्नोरिवामन्द्रं दुन्दुभेर्दुन्दुमायितम्॥ २॥

प्रकाशकायुधप्रयोगव्यापाराः। अनयोः सुदारुणसमरव्यापारमवलोक्य सर्वे सुरासुराः तारतम्यकरणासमर्थाः सन्तो बलवद्विस्मयापन्ना इति भावः। तयोर्द्वयमेव विस्मयकर-प्रकारं जानीहीत्यर्थः। पश्य पश्येति विस्मये द्विरुक्तिः।

झणज्झणितेति। झणज्झणितानि झणज्झणित्येवं शब्दकारीणि यानि कङ्कणानि हस्ताभरणविशेषाः, तद्वत् क्वणिताः शब्दायमानाः किङ्किण्यः क्षुद्रघण्टा यस्य तत् तथोक्तं; तथा गुरुणा महता, गुणेन मौर्व्या, अटनीभ्यां धनुरग्राभ्याञ्च कृतः करालो भयङ्करः कोलाहलः अस्पष्टमहाशब्दो यस्य तत् तादृशं, ध्वनत् साकल्येन अतीवशब्दायमानं धनुः कोदण्डं वितत्य विस्फार्य्य शरान् बाणान् किरतोः विक्षिपतोः तथा अविरतं निरन्तरं स्फुरन्त्यः शरक्षेपेण देहस्पन्दनात् चलन्त्यः चूडाः शिखा ययोः तथोक्तयोरनयोर्बालकयोः भुवनभीमं जगतां भयङ्करं विचित्रं विशेषविस्मयकरम् आयोधनं युद्धम् अभिवर्द्धते क्रमेण वृद्धिं प्राप्नोति।

अत्र प्रथमचरणे लुप्तोपमाऽलङ्कारः। तथा प्रथमे एकस्य मूर्द्धन्यणकारस्य, द्वितीये ककारस्य, तृतीये रेफस्य, चतुर्थे च चरणे मकारस्य असकृदसन्न्यासात् छेकानुप्रासः, अनयोः संसृष्टिः। किङ्किण्यो गुणः अटन्यौ च एते युगपदेव शब्दायन्ते, तेनैव समुदितं धनुः अतीव शब्दं करोतीति प्रतिपादनार्थं ध्वनत्पदमुपात्तं, तेन न अधिकपदत्व-दोषः।

---

(१) दिव्यस्त्वेति क्वचित् पाठः।

तत् प्रवर्त्त्यतामनयोः प्रवीरयोरनवरतमविरलललित [१] विकचकनककमलकमनीयसन्ततिः [२] अमरतरुतरुण [३] मणिमुकुलनिकरमकरन्दसुन्दरः पुष्पनिपातः । [ग]

"किङ्किणी क्षुद्रघण्टिका ।" "कोटिरस्याटनी" इति चामरः ।

झणज्झणाः शब्दा एषां सञ्जाता इति झणज्झणितानि तारकादित्वादितच् । पृथ्वी वृत्तम् "जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरु" रिति लक्षणात् ॥ १ ॥

विजृम्भितमिति । द्वयोरपि चन्द्रकेतुलवयोः दिव्यास्त्रम् उत्कृष्टमायुधं विजृम्भितं व्याप्तं परस्परं प्रति परस्परप्रयुक्तैरास्त्रैः समरस्थलमाकीर्णमित्यर्थः । तथा द्वयोरपि तयोर्मङ्गलाय उत्साहवर्द्धनरूपकल्याणाय सामयिकैर्मेघस्येव मेघवद्गम्भीरनादिन इत्यर्थः दुन्दुभेः तदाख्यवाद्यविशेषस्य आमन्द्रम् अतीवगम्भीरं दुन्दुमायितं दुम् दुम् इत्येवं शब्दश्च विजृम्भितं प्रादुर्भूतम् । उभयोरपि समरोत्साहवर्द्धनाय देवाश्च दुन्दुभिं वादयन्तीत्यर्थः ।

अत्र एकया विजृम्भितक्रियया दिव्यास्त्रदुन्दुमायितयोः कर्त्तृत्वेनान्वयात् तुल्ययोगिताऽलङ्कारः, उपमया सङ्कीर्णः, दुन्दु दुन्दु इति छेकानुप्रासेन संसृज्यते ।

"मन्द्रस्तु गम्भीरे" । "भेरी स्त्री दुन्दुभिः पुमानिति" चामरः ।

दुन्दुमायितमिति "अव्यक्तानुकरणादित्यादिना दुमदुमशब्दात् डाच् "डाचि विवक्षिते द्वे बहुलमिति दुन्दुमा, ततः "डाज्लोहितादिभ्यः ष्यः" इति क्यषि ततो भावे क्तः ॥ २ ॥

(ग) तदिति । तत्तस्मात् देवैरपि आनन्देन दुन्दुभिवादनादित्यर्थः प्रवीरयोः प्रकृष्टशूरयोः अनयोश्चन्द्रकेतुलवयोः उपरीति शेषः अविरलैरनल्पैः ललितैः सुन्दरैः विकचैः विकसितैः कनककमलैः सुवर्णपद्मैः कमनीया मनोहरा सन्ततिर्धारा यस्मिन् स तथोक्तः सुवर्णपद्मानामविच्छिन्नधारोवाहीत्यर्थः । तथा अमरतरूणां देवहक्षाणां

---

(१) लुलितेति पाठान्तरम् । (२) संहतिरिति पाठभेदः । (३) क्वचित् मणिशब्दो नास्ति ।

विद्याधरी । ता किं त्ति उण अआण्डविप्फुरिदतडिच्छडा-कडारं विअ अम्बरं झत्ति संवुत्तं । (घ)

विद्याधरः । तत् किन्नु खल्वद्य । (ङ)

त्वष्टृयन्त्र(१)भ्रमिभ्रान्तमार्त्तण्डज्योतिरुज्ज्वलः ।
पुटभेदो ललाटस्थनीललोहितचक्षुषः ॥३॥

(घ) तत् किमिति पुनरकाण्डविस्फुरिततड़िच्छटाकडारमिव अम्बरं झटिति संवृत्तम् ।

पारिजातादीनां यः तरुणमणिमुकुलनिकरः नवोत्पन्नमणिमयकलिकासमूहः तस्य मकरन्दैः रसैर्मधुभिरिति यावत् सुन्दरः सौरभातिशयात् मनोहरः पुष्पनिपातः साधारणकुसुमवृष्टिः प्रवर्त्यताम् आरभ्यताम् । अविच्छिन्नस्वर्णपद्मधारासहिता पारिजातादिदिव्यतरुपुष्पनिर्य्याससुरभीकृता साधारणपुष्पवृष्टिः क्रियतामिति सरलार्थः । देवैरपि दुन्दुभिवादनेनानन्दप्रकाशात् अस्माभिरपि पुष्पवृष्ट्या आनन्दः प्रकाशयितव्य इति भावः ।

अत्र वृत्त्यनुप्रासच्छेकानुप्रासयोरेकाश्रयानुप्रवेशरूपः सङ्करः ।

अभिनयप्रतिकूलतया ईदृशो दीर्घसमासविन्यासो नाट्यविदां दोष इति समालोचयन्ति ।

(घ) विद्येति । अन्यत्र वाचापि विद्येति नाम्न एकदेशमात्रोपन्यासे विद्याधरो विद्याधरी वेति संशयः स्यादिति विद्याधरी विद्याधरीति सम्पूर्णनाम्नोपन्यस्तम् । प्रश्नार्थबोधकं तत् किमित्यर्थकमव्ययम् । अप्रथमे पुनःशब्दः । अकाण्डे अनवसरे मेघाभावात् असमये इत्यर्थः विस्फुरितानां प्रकाशितानां तड़ितां विद्युतां छटाभिः प्रभाभिः कडारं पिङ्गलवर्णम् । अम्बरमाकाशं झटिति सहसा संवृत्तं जातमित्युत्प्रेक्षालङ्कारः ।

• (ङ) विद्येति । प्रश्नबोधकं तत् किन्नु इत्येकमव्ययम् । खलु वाक्यालङ्कारे । अद्य अस्मिन्नहनि ।

त्वष्टृ इति । त्वष्टुर्विश्वकर्म्मणो यद्यन्त्रं शाणयन्त्रं तस्य भ्रमिना घर्षणेन तया भ्रान्तः

---

(१) त्वाष्ट्रयन्त्रेति पाठान्तरम् ।

विचिन्त्य । आं ज्ञातं, वत्सेन चन्द्रकेतुना(१) प्रयुक्तमस्त्रमाग्नेयं, यस्यायमग्निच्छटासम्पातः(२) । सम्प्रति हि (च)

अवदग्धकर्बुरितकेतुचामरै-
रपयातमेव हि विमानमण्डलैः ।
दधति ध्वजांशुकपटाञ्चलेष्विमाः (३)
क्षणकुङ्कुमच्छुरणविभ्रमं शिखाः ॥४॥

घूर्णितो यो मार्त्तण्डः सूर्यः तस्य ज्योतिर्भिः इव उज्ज्वलो दीप्यमानः, ललाटस्थं भालस्थितं यत् नीललोहितस्य शिवस्य चक्षुर्नेत्रं तस्य पुटयोराच्छादनयोः भेदः अपसारणं तत्किन्नु जात इति शेषः । विश्वकर्म्मणा शाणयन्त्रे क्रियमानस्य सूर्य्यस्य तेजोवत् दीप्यमानः जगत्संहारिणो रुद्रस्य तृतीयनयनप्रकाशः किमयमिति सरलार्थः । तन्नयनाभिभाविदारुणत्वादिति भावः ।

अत्र उपमेये आग्नेयास्त्रे उपमानस्य तृतीयहरनयनतेजसः संशयात् सन्देहाऽलङ्कारः, स च लुप्तोपमया सङ्कीर्य्यते ।

पुरा किल भगवतो भास्करस्य सुदुःसहं तेज आसीत्, ततो ब्रह्मणो वाक्यानुसारेण सर्वैरनुज्ञया च विश्वकर्म्मा स्वकीयशाणयन्त्रे रविमण्डलमारोप्य असकृत् परिभ्रामयन् किमपि किमपि संछिद्य तस्य तेजोह्रासं विदधौ इति मार्कण्डेयपुराणवार्त्ताऽत्रानुसन्धेया ॥३॥

(च) विचिन्त्येति । विचिन्त्य विशेषचिन्तया निर्णीय । आं इति स्मरणार्थमव्ययम् । आग्नेयम् अग्निर्देवतम् । प्रयुक्तं निक्षिप्तम् । यस्य आग्नेयास्त्रस्य अयं दृश्यमानः अग्निच्छटासम्पातः वह्निप्रभाप्रसारः वर्त्तत इति शेषः । हि तथाहि अग्निर्देवता अस्येत्याग्नेयं "सवं साग्निकालिभ्यां ~~[illegible]~~ठञ्यः" ।

अवदग्धेति । अवदग्धानि अंशतः प्लुष्टानि अतएव कर्बुरितानि विचित्रीकृतानि

---

(१) जातवेदसेन चन्द्रकेतुना इति पाठान्तरम् । (२) हस्यायमिति पाठभेदः ।
(३) ध्वजांशुक इति विभिन्नः पाठः ।

आश्चर्य्यं, प्रवृत्त एवायमुच्चण्डवज्रखण्डावस्फोटपटुः (१) स्तूतसर्पिःस्फुलिङ्गगुरुरुत्तालतुमुललेलिहानज्वालासंभारभैरवो-भगवानुषर्बुधः । प्रचण्डश्चास्य सर्वतः सन्तापः, तत् प्रियामङ्के-नाच्छाद्य दूरमपसरामि । तथा करोति । (क)

केतुचामराणि ध्वजदण्डशालव्यजनानि येषां तैः स्तयोक्तैः विमानमण्डलैः व्योमयानमूहैः अपयातमिव दारुभयेन रणान्तरीचात् अपसृतमिव । तथा इमाः शिखाः अग्निज्वालाः ध्वजानां केतुदण्डानां अङ्कुशानां ध्वजदण्डाग्रे स्थितानां स्रजीणां पटाञ्चलेषु वसनप्रान्तेषु पताकैकदेशेषु इत्यर्थः क्षणं व्याप्य यत् कुङ्कुमच्छुरणं कुङ्कुमरागरञ्जनं तस्य विभ्रमं कान्तिं दधति धारयन्ति, आग्नेयास्त्रवह्निशिखासंसर्गात् ध्वजाग्रस्थपताकाः कुङ्कुमरञ्जिता इव प्रतिभान्तीत्यर्थः । दारुणोऽयमस्त्रप्रभाव इति भावः ।

अत्र अन्यस्य विभ्रमं कथमन्यो वहेदिति वस्तुसम्बन्धोऽसम्भवन् कुङ्कुमच्छुरणविभ्रममिव विभ्रमं दधतीति विम्बप्रतिविम्बभावं बोधयतीति निदर्शनाऽलङ्कारः । तथा निष्प्रयोजनह्रिशब्दप्रयोगात् निरर्थकत्वदोषः, स च 'प्रपलायितं खलु विमानमण्डलै'रिति पाठेन समाधेयः ।

"चित्रं किर्मीर कल्माष शबलैताश्च कर्बुरे ।" "अङ्कुशोऽस्त्री सृणिः स्त्रिया"मिति चामरः । वस्त्रस्यान्तो भतोऽञ्चलः ।" 'लक्ष्मीश्रीकान्तिविभ्रमा"इति च हलायुधः ।

कर्बुराणि कृतानीति कर्बुरितानि करोत्यर्थेनन्तात् कर्मणि क्तः ।

मञ्जुभाषिणी वृत्तम् ' सजसा जगौ च यदि मञ्जुभाषिणी"ति लक्षणात् ॥४॥

(क) आश्चर्यमिति । उच्चण्डानां काठिन्येन भीषणानां वज्रखण्डानां अशनिखण्डानाम् अवस्फोटे दारणे विदारणे पटुः समर्थः नितान्तकठिनवज्रखण्डानपि दग्धुं क्षम इत्यर्थः; तथा स्तूतसर्पिभिः ऊर्द्धं प्रसरद्भिः स्फुलिङ्गैः अग्निकणैः गुरुर्महान्, तथा उत्ताला विकरालाः, तुमुलं सङ्कुलं यथा स्यात्तथा लेलिहाना: अत्यर्थं ग्रसनशीला: अग्नि-

---

(१) वज्रखण्डावस्फोटपटुतरस्फुलिङ्गविकृतिरिति क्वचित् पाठः ।

विद्याधरी। दिट्ठिआ एदेन विमलमोत्तिअफलसीदल(१)सिणिद्धमसिणमंसलेन(२)णाहदेहप्फंसेण आनन्दमन्दमउलिद-घुम्मन्तलोअणाए अन्तरिदो ज्जेव सन्दावो। (ञ)

विद्याधरः। अयि! किमत्र मया कृतम्। अथवा। (झ)

(ञ) दिष्ट्या एतेन विमलमौक्तिकफलशीतलस्निग्धमसृणमांसलेन नाथदेहस्पर्शेन आनन्दमन्दमुकुलितघूर्णल्लोचनाया अन्तरित एव सन्तापः।

यतमावेनेतस्ततः प्रसरन्त्य इत्यर्थः या ज्वाला अर्चिषः तासां सम्भारेण समूहेन भैरवो भयङ्करः भगवान् महामनाः मयं उषर्बुधः अग्निः प्रवृत्त एव उत्पन्न एव। स्वयोग-व्यवस्थापने एवशब्दः। क्रियेति चार्थः। अस्य अग्नेः सन्तापः, सर्वतः सर्वास्वेव दिक्षु प्रचण्डः अतुलः, तत्कथात् अनाहतदेहेन प्रियाया अपसरणासम्भवादित्यर्थः; अहं न स्वकीयवक्षःप्रच्छदनेन।

'उत्ताल उत्कटः श्रेष्ठे विकराले प्रधाने" इति मेदिनी। 'शोचिष्केश उषर्बुध" इति वह्निपर्याये अमरः।

(ञ) विद्याधरीति। दिष्ट्या भाग्येन। विमलं विशुद्धं यत् मौक्तिकफलं मुक्ता-फलं तदिव शीतलः, स्निग्धः अरूक्षः मसृणः श्लक्ष्णः (पालिश इति यस्य भाषा), मांसलः कठिनश्च तेन तथोक्तेन, नाथस्य अस्य मे पत्युः देहस्य स्पर्शेन करणेन आनन्देन स्पर्श-सुखेन मन्दम् अल्पं यथा स्यात्तथा मुकुलिते मुद्रिते, घूर्णन्ती चञ्चले, लोचने चक्षुषी यस्याः, तथोक्ताया ममेत्यर्थः सन्तापः वह्निज्वालास्पर्शजन्या पीडा, अन्तरितः दूरीकृतः। भर्त्रावरणेन वह्निज्वालास्पर्शाभावात् सुखान्तरोदयाच्चेति भावः। अन्तरित मुकुलितेति अन्तरमुकुलशब्दाभ्यां करोत्यर्थे णिजन्ताभ्यां कर्मणि क्तः।

'बलवान् मांसलोंऽसल" इत्यमरः।

(झ) विद्याधर इति। अयीति सखेदसम्बोधने। अत्र तव सन्तापनिवारण-विषये।

(१) विमलमोत्तिअसरसीदल इति पाठान्तरम्। (२) सिणिद्धमसिणोवाणमांसलेन इति पाठभेदः।

अकिञ्चिदपि कुर्वाणः सौख्यै र्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥५॥

विद्याधरी । कहमविरलविलोलघुम्मन्तविज्जुल्लदाविलाससमभिङ्गदेहिं मत्तमोरकण्ठसामलेहिं ओत्थरीअदि णहत्थलं जलहरेहिं । [ञ]

विद्याधरः । हन्त ! हन्त ! कुमारलवप्रयुक्तवारुणास्त्रप्रभावः खल्वयम् । कथमविरलप्रवृत्तवारिधारासहस्रसम्पातैः प्रशान्तं पावकास्त्रम् । [ट]

(ञ) कथमविरलविलोलघूर्णद्विद्युल्लताविलाससमञ्चितैर्मत्तमयूरकण्ठश्यामलैरास्तीर्यते नभस्तलं जलधरैः ।

अकिञ्चिदिति । श्लोकोऽयं द्वितीयेऽङ्के रामेण पठितः, तत्र च व्याख्यातः ॥५॥

(ञ) विद्याधरीति । अविरलं निरन्तरं विलोलानां चञ्चलानां घूर्णन्तीनां भ्रमन्तीनां विद्युल्लतानां सौदामिनीदाम्नां विलासेन विभ्रमेण मण्डितैः भूषितैः, तथा मत्तमयूराणां कण्ठा इव श्यामलाः श्यामवर्णास्तैः, जलधरैर्मेघैः नभस्तलम् आकाशदेशः कथम् आस्तीर्यते आच्छाद्यते ।

(ट) विद्याधर इति । हन्तेति हर्षसूचकमव्ययम् तदतिशये द्विरुक्तिः । कुमारेण लवेन प्रयुक्तं चन्द्रकेतोराग्नेयास्त्रनिवारणाय निक्षिप्तं यद्वारुणं वरुणदैवतमस्त्रं तस्य खलु तस्यैव वारुणास्त्रस्य प्रभावः सामर्थ्यम् अयं जलधरप्रादुर्भावः । अविरलं निरन्तरं प्रवृत्तानि यानि वारिधारासहस्राणि वृष्टिधारासमूहाः तेषां सम्पातैः पतनैः पावकास्त्रं चन्द्रकेतोराग्नेयास्त्रं प्रशान्तं निर्वापितम् । कथमिति सम्भावनायोत्थयं ।

'हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयो'रित्यमरः । 'कथ' (व्य) ···सम्भावना" इति शब्दकल्पद्रुमः ।

विद्याधरी । पिअं मे पिअं मे । [ठ] [१]

विद्याधरः । हन्त ! हन्त ! [२] सर्वमतिमात्रं दोषाय, यत् प्रबलवातावलिक्षोभगम्भीरगुणगुणायमानमेघमेदुरान्धकारनीरन्ध्रनिबद्धम् [३] एकवारविश्वग्रसनविकच [४] विकरालकालकण्ठकण्ठ [५] कन्दरविवर्त्तमानमिव युगान्तयोगनिद्रानिरुद्धसर्वद्वार [६] नारायणोदरनिविष्टमिव भूतजातं प्रवेपते । [७] [ड]

(ठ) प्रियं मे प्रियम् ।

(ठ) विद्याधरीति । प्रियं दारुणाग्नेर्याश्च प्रशमनमित्यर्थः पुनःसन्तापसम्भावनाऽभावादिति भावः । हर्षातिशये द्विरुक्तिः ।

(ड) विद्याधर इति । अत्र हन्तशब्दो विषादसूचकः, भयसम्भ्रमे द्विरुक्तिः । मात्रां परिमाणमतिक्रान्तमित्यतिमात्रं सर्वं जगत्यां सर्वं वस्तु अतिमात्रम् अत्यर्थं सत् दोषाय सम्पद्यत इति शेषः । यद्यस्माद्धेतोः, प्रबलाया बलवत्याः, वातावल्याः वात्यायाः क्षोभेण सञ्चलनेन गम्भीरं मन्दं यथा स्यात्तथा गुणगुणायमानाः 'गुण गुण' इत्येवमव्यक्तं शब्दं कुर्वन्तः ये मेघाः तैः मेदुरं स्निग्धं निविड़मित्यर्थः यदन्धकारं तम तेन नीरन्ध्रं निरवकाशं गाढ़मिति यावत् यथा तथा निबद्धं धृतम् आहतमित्यर्थः भूतजातं प्राणिसमूहः, एकेनैव वारेण उद्योगेन विश्वस्य जगतः ग्रसनाय ग्रासाय विकचः व्यात्तः यः विकरालः भयानकः कालकण्ठस्य नीलकण्ठस्य संहारमूर्त्तेः रुद्रस्येत्यर्थः कण्ठकन्दरः गलविवरं तत्र विवर्त्तमानमिव अवतिष्ठमानमिव सत् जगत्संहाराय व्यात्ताननस्य रुद्रस्य मुखपथेन कण्ठविवरं प्रविष्टमिव सदित्यर्थः, तथा युगान्ते प्रलय-

---

(१) क्वचित् पिअं मे इत्यस्य द्विरुक्तिर्नास्ति । (२) क्वचित् भो भो इत्यधिकः पाठः । (३) नीरन्ध्रं निरुद्धमिति पाठान्तरम् । (४) विकट इति पाठभेदः । (५) मुख इति क्वापि पाठः । (६) युगान्तनिद्रा इति क्वचित् योगशब्दशून्यः पाठः । (७) विपद्यते इति विभिन्नः पाठः ।

साधु वत्स ! चन्द्रकीर्ते ! साधु, स्थाने वायव्यास्त्रमीरितम्। यतः [ढ]

काले यो योगः चित्तवृत्तिनिरोधः स निद्रा इव तया, निरुद्धानि संवृतानि सर्वाणि द्वाराणि मुखनासिकादिप्रवेशनिर्गमनमार्गा येन तस्य नारायणस्य उदरे जठरे निलिप्य-मवस्थितमिव च सत् प्रवेपते कम्पते। सम्प्रति प्राणिनो गाढान्धकाराहताः सन्तः 'किम-यमुपस्थितः प्रलयकालः, येन वयं जगत् ग्रसतो रुद्रस्य कण्ठविवरं प्रविष्टा इव नारा-यणोदरावस्थिता इव च प्रबलान्धकाराहताः संवृत्ता" इत्यादि नानाविधमुत्प्रेक्षमाणा भयेन कम्पन्त इत्यर्थः। प्राणिनामयमुद्वेगस्तु लवप्रयुक्तवारुणास्त्रप्रभावेणैव, सुतरां सातिशयमस्त्रप्रयोगं दोषं विना किं ब्रूम इति भावः।

अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, स च क्रियोत्प्रेक्षायेन सङ्कीर्यते।

'सान्द्रस्निग्धस्तु मेदुरः" 'युक्ते क्ष्मादावृते भूतं' प्राण्यतीते समे त्रिष्विति चामरः।

गुणगुणेत्येवं शब्दं करोतीति गुणगुणायमानः 'अव्यक्तानुकरणा"दित्यादिना डाच् डाज्लोहितादिभ्यः क्यष्" इत्यादिः तत शानच्।

प्रलयकाले रुद्रो जगत् संहरति। तथा च कूर्मपुराणे,४२ अध्याये—

'एवं संहृत्य भूतानि तत्त्वानि च महेश्वरः।

नियोजयत्यथान्योन्यं प्रधानं पुरुषं परम्।"

प्रलयकाले नारायणशरीरे जगत्प्रवेश उक्तः शिशुपालवधेऽपि, १ सर्गे—

'युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत।'

(ढ) साध्विति। साधु भद्रं कृतमिति शेषः इयं विरुक्तिः। वायव्यास्त्रं वायुदैवत-मस्त्रं तत् ईरितं प्रेरितं निक्षिप्तमित्यर्थः तत् स्थाने युक्तम् उचितमेवाभूदित्यर्थः; अन्यथा लवप्रयुक्तवारुणास्त्रप्रभावेण जाता प्राणिनां महती प्राणाशङ्का कथमपि न निवर्त्तेतेति भावः। साधुकरणकारणमाह यत इति।

'युक्ते द्वे साम्प्रतं स्थाने' इत्यमरः।

विद्याकल्पेन मरुता मेघानां भूयसामपि ।
ब्रह्मणीव विवर्त्तानां क्वापि विप्रलयः कृतः ॥६॥

वायव्यमिति "वाय्वृतुपित्रुषसो यत्" इति यत् प्रत्ययः ।

विद्येति । विद्याकल्पेन तत्त्वज्ञानतुल्येन तुल्यत्वञ्चास्य लयकरणांशे, मरुता चन्द्रकेतुप्रयुक्तवायव्यास्त्रप्रादुर्भूतवायुना भूयसामपि प्रचुराणामपि मेघानां लवनिचितवारुणास्त्रप्रादुर्भूतजलधराणां विवर्त्तानां परमार्थतः सत्तारहितानां नामरूपादिभेदभिन्नानां घटपटादिजगत्प्रपञ्चानामित्यर्थः ब्रह्मणि अद्वितीये सच्चिदानन्दस्वरूपे परमात्मनि इव क्वापि कस्मिन्नपि अदृश्यस्थाने विप्रलयः तिरोधानं कृतः । यथा सद्गुरोरुपदेशवशेन 'तत्त्वमसि' 'एकमेवाद्वितीयं ब्रह्म नेह नानाऽस्ति किञ्चने'त्यादिवाक्यानां सम्यक् तात्पर्य्यालोचनादिभिः समुत्पन्नेन तत्त्वज्ञानेन तात्त्विकरज्जुज्ञानेन सर्पभ्रम इव नामरूपादिविविधभेदभिन्नानां घटपटादिजगत्प्रपञ्चानां पृथक्सत्ताविषयको भ्रमो निरस्यते परन्तु केवलमद्वितीयब्रह्मैवावतिष्ठते, तथा अस्य वायव्यास्त्रस्य प्रभावेण मेघनिवहो निरस्तः परन्तु केवलं निर्म्मलं नभ एवावतिष्ठते इति सरलार्थः । विद्यया अविद्यानाशे सतीव वायव्यास्त्रज्ञानेन वारुणास्त्रनाशे सति सम्प्रति लोको निरुपद्रवः संवृत्त इत्यतीवानन्दकारणमिति भावः ।

अत्र प्रथमार्द्धे कल्पशब्दोपादानादार्थी उपमा, द्वितीयार्द्धे च इवशब्दोपादानात् श्रौती उपमा ; अनयोः परस्परसापेक्षत्वात् सङ्करः ।

'वस्तुस्वरूपावधारणं विद्यामाहु"रिति शारीरकभाष्ये भगवान् शङ्कराचार्य्यः ।

'परमोत्तमपुरुषार्थसाधनीभूता विद्या ब्रह्मज्ञानरूपे"ति नागोजीभट्टः । ब्रह्मलक्षणमाह वेदान्तभाष्यधृता श्रुतिः, 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्म ।"

'जन्माद्यस्य यत" इति वेदान्तसूत्रञ्च । विवर्त्तमाह वेदान्तसारे--

'सतत्त्वतोऽन्यथाप्रथा विकार इत्युदाहृतः ।
अतत्त्वतोऽन्यथाप्रथा विवर्त्त इत्युदीरितः ।"

तत्त्वज्ञानेन विवर्त्तनिवृत्तिस्तु वेदान्तदर्शनादौ द्रष्टव्या ॥६॥

विद्याधरी। णाह! को दाणिं एसो ससम्भमुक्खित्तकरब्भमिदपट्टअञ्चलो (१) दूरदो ज्जेव महुरवअण (२) पडिसिद्धजुज्झवावारो एदाणं कुमाराणं अन्तरम्मि (३) विमाणवरं (४) ओदरावेदि। (ण)

विद्याधरः। दृष्ट्वा। एष शम्बूकवधात् प्रतिनिवृत्तो रघुपतिः! (त)

शब्दं महापुरुषसंविहितं निशम्य
तद्गौरवात् समुपसंहृतसम्प्रहारः।

(ण) नाथ! क इदानीमेष ससम्भ्रमोत्क्षिप्तकरभ्रमितपट्टकाञ्चलो दूरत एव मधुरवचनप्रतिषिद्धयुद्धव्यापार एतयोः कुमारयोः अन्तरे विमानवरमवतारयति।

(ण) विद्याधरीति। एष दूरे दृश्यमानः, ससम्भ्रमं सत्वरम् उत्क्षिप्तेन उत्तोलितेन करेण हस्तेन भ्रमितो घूर्णितः पट्टकाञ्चलः वस्त्रविशेषप्रान्तभागो येन स तथोक्तः। दूरतो निवारणवचनश्रवणासम्भवशङ्कया कुमारयोर्दृष्टिराकर्षणार्थं वस्त्राञ्चलघूर्णनमिति बोध्यम्। मधुरेण प्रीतिपूर्णेन वचनेन वाक्येन प्रतिषिद्धः निवारितः युद्धव्यापारः संग्रामकार्यं येन स तथोक्तः। यदि अश्रुण्वतामिमाविति सम्भावनया युद्धनिवारणाय निषेधवाक्यमप्युक्तमिति ज्ञेयम्। कुमारयोश्चन्द्रकेतुलवयोः अन्तरे मध्यस्थले विमानवरं व्योमयानश्रेष्ठं पुष्पकमित्यर्थः अवतारयति अवरोहयति।

(त) विद्याधर इति। रघुपतिः रामः, शम्बूकधात् शम्बूकवधं कृत्वेत्यर्थः ल्यब्लोपे पञ्चमी।

शब्दमिति। महापुरुषेण प्रभावातिशयशालिना रामेण संविहितं कृतम् उच्चारितमित्यर्थः शब्दं समरव्यापारात् निवर्तेथां युवामित्येवं वाक्यमित्यर्थः निशम्य श्रुत्वा

(१) करब्भमिदउत्तरीआञ्चल इति पाठान्तरम्। (२) महुरक्खिप्पिअवअण इति पाठभेदः। (३) मज्झ इति क्वापि पाठः। (४) विमाणमिति भिन्नः पाठः।